श्रीः

श्रीमते रामानुजाय नमः

श्री वराहगुरुणाविरचितायां क्रियाकैरवचन्द्रिकायां प्रथमः परिच्छेदः

भूपरीक्षा विधिः

आदौ भूपरीक्षा विधिः उच्यते

श्रद्धावान् आस्तिको भक्तः धनधान्यौ समेधितः।

महोत्साहः शुचिः दक्षः कृतज्ञो लोभवर्जितः।

ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वाप्यनुलोमजः।

इत्याद्युक्तैः समस्तगुणैः समेतः यजमानः

पाञ्चरात्रविदं शान्तं सिद्धान्तेषु कृतश्रमम्।

भगवद्वंशजं शुद्धं अलोलुपमदांभिकम्।

अपापमृजुमव्याधिमदृष्टपरमास्तिकम्।

इत्याद्युक्त लक्षणं आचार्यं प्रथमं वरयेत्। ततः आचार्यो यजमानश्च दैवज्ञेन सह शुभे दिने ग्रामादिस्थापनाय आदौ निमित्तानि परीक्ष्य। शुभे निमित्ते ग्रामादीन् आरभेत।तदर्थं रथकारेण सह आचार्यः भुवं परीक्षेत।

अथ भूमि लक्षणम् उच्यते-सुपद्मा, भद्रका, पूर्णा,धूम्रा च इति भूमि श्चतुर्विधा। सुपद्मा-चंपकागरु खर्जूर कदंब तिलकार्जुन क्रमुक नारिकेल कुश काश कमल कुवलययुता प्रागुदक्प्रवणा शुभतोयावृता।

भद्रका-नदीसागर पार्श्वस्था तीर्थायतनम्- आश्रिता क्षीरवृक्ष फलवृक्षसमाकुला उद्यानोपवनोपेता लतागुल्म यज्ञ वृक्ष कुशकाशव्रीहि क्षेत्रैः अधः जलेन च उपेता।

पूर्णा-कुलुत्थ कंकु निष्पाव कोद्रव श्यामाकान्विता आप्रभूतोदक गिरि पार्श्वं गिरिशिखरं वा आश्रिता।

धूम्रा- यववेणुस्नुहिश्लेष्मातक विभीतकार्कसंकीर्णं कठिन शर्करान्विता वायस श्येनगृध्र गोमायुवृक संकुला ऊषरान्विता।

सुपद्मा शान्तिदा। भद्रका सुखदा। पूर्णा पुष्टिदा।धूम्रा क्षयदा।

भूमिम् एवं विधां ज्ञात्वा।तां दण्डमानेन विस्तारायामयोः सदृशं जानुदघ्नं खात्वा। पुनः ताभिरेव मृद्भिः पूरिते समाधिके उत्तमाम्।समे मध्यमाम्। न्यूने अधमाम् ज्ञात्वा । अधमां वर्जयित्वा। अन्ययोः शालिमुद्ग यवादीनां बीजान्युप्त्वा परीक्षेत ।

त्रिरात्राभ्यन्तरे यद्यङ्कुराः समुद्भूताःतदा उत्तमा । पञ्चरात्राभ्यन्तरे चेत् मध्यमा, सप्त रात्राभ्यंतरे चेत् अधमा।अङ्कुरेषु अप्ररूढेष्वपि अधमैव। अधमां वर्जयेत् । अन्ये गृह्णीयात्। कुशपलाश हरिणाः यत्र विद्यंते सा अधमा अपि उत्तमा । मधुरेण रसेन युक्ता उत्तमा।कटुका मध्यमा। आम्लाद्यन्य रसा अधमा। श्वेता उत्तमा। पीत लोहिता मध्यमा। कृष्णा अधमा।संयक् एवं विचार्य पाञ्चरात्रवित् आचार्यः यजमानेन रथकारेण च साकम्,वास्तुसीमनि नृत्तगीतवाद्य मंगलपाठ पूर्णकुम्भ दीपध्वज छत्रसमन्वितम् सवेदाध्ययनं स्वस्तिवाचनेन सह प्रदक्षिणं परिक्रम्य। सर्वास्वपि दिक्षु विदिक्षु च प्रागादि पिशाचादीनां पायसैः ब्रह्मस्थानांतं बलिकर्म कुर्यात् ।

भूताः पिशाचाः नागाश्च असुराः राक्षसाः ग्रहाः।

सर्वे ते व्यपगच्छन्तु बलितुष्टाः यथा तथम्।

देवानां च द्विजानां च स्थानं सम्यक् करोम्यहम्।

वासुदेवस्य देवस्य सर्व भूतात्मकस्य च

इति मंत्रं उदीरयन्, अस्त्र मन्त्रेण संसिद्धान् सिद्धार्थान् सर्वतः विकीर्य। यथाविधि बलिंदत्वा। तत्रसूत्राणि निपात्य। सूत्रसंधिषु शंकून् संस्थाप्य। ततः यथाविधि वास्तुपूजां कुर्यात्।

अधोमुखं प्राक्छिरसं कोणप्रसारित पाणि पादम् वास्तु पुरुषं विलिख्य आवाह्य अभ्यर्च्य। वास्तुपुरुषस्य दक्षिणतः अग्नि कुण्डे स्थण्डिले वा विधिवत् संस्कृतम् अग्निं दीपयित्वा। तस्मिन् तमावाह्य पञ्चोपनिषदा घृतेन आहुतीनां सहस्त्रं शतं वा अपामार्ग शमी खादिराणां समिद्भिश्च तावत् हुत्वा।अग्निं यक्षरक्षः पिशाचानाम् पूर्वोक्ताभिः समिद्भिः पूर्वोक्त संख्यया स्वयं हुत्वा। ततः मूलमंत्राभ्यां पृथक् अष्टोत्तरशताहुतीः वास्तुनाथ मंत्रेण चरुणा आहुतीनां शतं च हुत्वा। पूर्णाहुतिं हुत्वा। अग्निस्थं उद्वास्य। अष्टासु दिक्षु इन्द्रादीनां स्वस्वमन्त्रेण बलिंदद्यात्।

इति श्री वराहगुरुणा विरचितायां क्रियाकैरव चन्द्रिकायां

भूपरीक्षा विधिः नाम प्रथमः परिच्छेदः

दानपालनयोर्मध्ये दानात् श्रेयोनुपालनम्।

दानात् स्वर्गमवाप्नोति पालनादच्युतं पदम्।

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।

षष्टिवर्ष सहस्राणि विष्टया जायते कृमिः।

स्वदत्तात् द्विगुनंपुण्यं परदत्तानुपालनम्।

परदत्ताऽपहारेण स्वदत्तं निष्पलं भवेत्।

एकैव भगिनी लोके सर्वेषामेव भूभुजाम् ।

न भोज्या न कदा ग्राह्या विष्णुदत्ता वसुंधरा।(नीतिश्लोकम्)।

****

द्वितीयः परिच्छेदः

कर्षणम्

अथ कर्षण विधिः: उच्यते-

एवं ग्रामादि कल्पयित्वा, तन्मध्ये मन्दिरनिर्माणार्थं पूर्वोक्तां भूंमि प्रवेश बलिपूर्वकम् आसाद्य तां प्रदक्षिणीकृत्य,

यक्षा: पिशाचा: नागाश्च येऽत्र तिष्ठन्ति सर्वदा।

सर्वे प्रयांतु तेऽन्यत्र विष्णो: स्थानं करोम्यहम्।

इति मंत्रेण अस्त्रमंत्रसंसिद्धान् सिद्धार्थान् सर्वत: दिक्षु विकीर्य, पूर्ववत् वास्तु पूजां होमं च बल्यन्तम् कृत्वा। अनन्तरम् आचार्य: वक्ष्यमाणेन विधिना हलेन भूमिं विलिखेत्।यजमान: ब्राह्मणश्चेत् अनड्वाहौ गौरवर्णौ।यदिक्षत्रिय: लोहितौ। यदि वैश्य: पीतौ। यदि शूद्र: मेचकौ। उक्तवर्णानां अलाभे कपिलौ गौरौ रक्तौ वा। तौ महान्तौ बलशालिनौ वृषभौ क्षालयित्वा। खुर

शृङ्गादीनि कनकमयै: भूषणै: भूषयेत् ।

ब्राह्मणो यजमान: चेत् युगं हलं च पालाशम्, क्षत्रिय: यदि नैयग्रोधम्, यदि वैश्य: प्लाक्षम्, सर्वेषां वर्णानां नैयग्रोध पैप्पले वा स्याताम्।सर्वेषां कौशिक: सौवर्णा योक्रं राजतं ताम्रं वा।कुशा:, धनुज्र्या, वीरण्य:, काशाश्च यथावर्णम् क्रमात् रज्जु:। हलभूतमध्यौ एकयोनिके।सर्वं एवं कृत्वा। तत: स्नात: नवांबरधर: सर्वालङ्कारसंयुक्त: आचार्य: पादौ प्रक्षाळ्य। आचम्य। प्राणानायम्य. भूतशुद्धिं कृत्वा। ब्राह्मणै: अनुज्ञात: मन्त्रज्ञै: वैष्णवै: सह पुण्याहं वाचयित्वा। तज्जलेन सर्वं द्रव्यजातं आत्मानं च प्रोक्ष्य। मूलमन्त्रेण वृषस्कन्धे युगं संयोज्य। तेनैव मन्त्रेण हलं युगे संयोज्य। सुमुहूर्ते भेरी पटह शङ्खादिवाद्य घोषपुरस्सरं शाकुन सूक्तादि वेदघोषसहितं प्राङ्मुखः गुरु: हृदयकमले नारायणं ध्यायन्। पालाशादि दण्डं प्रवहणं कृत्वा। तत: तोदनं आदाय। हुंफडादिना आपीड्य। प्राङ्मुखः मूलविद्यया प्रथमं कर्षयेत्। पौरुषेण सूक्तेन द्वितीयं, विष्णुसूक्तेन तृतीयं, विष्णु गाय त्र्या तुरीयम्, नारायणानुवाकेन पञ्चमम्, पञ्चोपनिषन्मंत्रै: षष्टम्, भूसूक्तेन सप्तमम् कर्षणम्। सर्वं प्रादक्षिण्य क्रमेण। दक्षिणोत्तरतश्च एवं कर्षयेत्।

तत्काले निमित्तानि परीक्षेत्। आचार्यस्यमनस्तुष्टि: मन्दिर यजमानयो: शर्मणे भवेत् । तद्विपर्ययश्च असुखाय। अनड्वहो: शयने, योक्रादिभेदने, व्यत्यासभ्रमणे, अन्यनिमित्तोदये च सर्व दोषशान्त्यर्थं पञ्चोपनिषदा सर्पिषा शतमाहुतीनां जुहुयात्। तत: आचार्य: यजमानश्च ब्राह्मणान् तोषयित्वा।तां भुवं महतायत्नेन समीकृत्य, पृथक् पृथक् आलवालानि जलकुल्यायुतानि कारयित्वा। तोयेन आसिच्य। तत्र शाली मुद्ग यवादि बीजानि वापयेत्। तदभिवृद्ध्यर्थं प्रतिदिनं महताजलेन संसिच्य। परिपाकावसानिकं रक्षेत्।तत: फलानि पक्कानि लूत्वा। फलरहितं क्षेत्रं गाः समानीय चारयेत्। सस्य भूरिफले तद्धाम दीर्घकालं भविष्यति। अल्पे तु अल्पतरं कालम्। हरे: सन्निधानं च पूर्ववदेव। फलहीने प्रक्षीणधनधान्यकम्।तत्र सहस्त्रं शतं वा ब्राह्मणान् भोजयित्वा। तेभ्यश्च गो धनादि दक्षिणान् वितीर्य। पञ्चगव्येन पञ्चोपनिषदा तत्क्षेत्रं संप्रोक्ष्य। कुद्दालै: खनित्रै: वा, यावंब: तावत् भूमिं खनेत्। यावत् प्रथमावरण विस्तार: तावत् दण्डमात्रं वा क्षेत्रदोषानुरूप्येण, मन्दिरोच्छ्रायानुगुण्येन वा, भूतले खन्यमाने ;भस्माङ्गार तुषदुष्ट सत्वक्रिमि कीटादि दर्शने घृतादिना शान्ति होमं कृत्वा;ब्राह्मणेभ्य: यथाशक्ति सुवर्णादि दक्षिणां दद्यात्। रत्नादि दर्शने धाम सदासमृद्धं भवेत्।खातात् बहि: चतुरश्रे स्थण्डिले अग्निं प्रतिष्ठाप्य, मूलमन्त्रेण आज्येन नृसूक्तेन चरुणा गुग्गुलु तिल नीवारै: मूलमन्त्रेण च खातहोमं कृत्वा। पुण्याहं वाचयित्वा प्रोक्ष्य। शालीन् खाते प्रक्षिप्य।तदुपरि वस्त्रसूत्रादि वेष्टितान् लोहमयान् मृण्मयान् वा कुम्भान् नव संस्थाप्य।आधारशक्तिं सौवर्णीं मध्यकुम्भे निक्षिप्य।प्राच्यां बीजानि आग्नेय्यां सर्वलोहानि, दक्षिणे सर्वधातून्, नैऋते पुण्यतीर्थमृदम्, वारुणे मधु, वायवीये सर्पि:, उत्तरस्यां दिशि रत्नानि, ऐशाने शैलमृत्तिकां च निक्षिप्य। पुनश्च मध्ये शालिक्षेत्र मृदम् आशोष्य ह्रदसंभूतां मृदम् वल्मीकमृदम् उत्पलकन्दानि च प्राङ्मुखः स्थित्वा निक्षिप्य।

तत्र लोहानि रत्नानि दर्भकूर्चं च निक्षिप्य शरावेण पिदाय।मध्यकुम्भस्य उपरि अन्य कुंभम् निधाय, तस्मिन् सौवर्णं कूर्मकालाग्निं निक्षिप्य।तस्य उपरि कुम्भं अन्यं निधाय। तस्मिन् सौवर्णीं अनन्ताकृतिं निक्षिप्य। तदुपरि च अन्यं कुम्भं तस्मिन् सौवर्णीं वसुधां तदुपरि च अन्यं कुंभं तस्मिन् सौवर्णे अंबुजं च निक्षिप्य।सर्वान् गन्धोदकेन संपूर्य।पुण्याभिः खात मृद्भिः अदुष्टाभिः वालुकाभिश्च पूरयित्वा। जलै: खात भूतलं संपूर्य। हस्तिपादैः धृडीकृत्य।पुन: जलेन परिपूरयेत्।

इति श्री वराहगुरुणा विरचितायां क्रियाकैरव
चन्द्रिकायां कर्षणविधिः नाम द्वितीयः परिच्छेदः

****

तृतीयः परिच्छेदः

बालालय प्रतिष्ठा विधिः

अथ बालालय प्रतिष्ठा विधिःउच्यते - आरभ्यमान प्रासादस्य इन्द्रेशानांऽतरे सोमेशयोः इन्द्राग्न्योः यमनैऋत्योः नित्रृति वरुणयोः वरुण वाय्वोः वायुसोमयोः वा अन्तरे स्वाभिमते देशे बालालयं प्रकल्पयेत्। तत्र सप्तभिः पञ्चभिः त्रिभिः वा हस्तैः बालालयं कल्पयेत्।मूलमन्दिरस्य वलजं यस्यां दिशि तस्यामेव बालालयस्यापि निदध्यात्। लोहजं शैलजं दारुजं वा चतुर्भुजं शङ्खचक्र गदापद्मधरं उत्सेधतोह्रासे पञ्चाङ्गुलं वृद्धौ त्रयो विंशत्यङ्गुलं यजमान सुखावह मानानुगुणं वा बालबिम्बं कार्यम्। मूलालयस्थाप्येषु मत्स्याद्यवतारेषु बालबिम्बं वा तथारूपं, विश्वरूपे तु चतुर्भुजं, स्थित्यासन शयनेषु च तथैव (स्थित्यासन शयनरूपं) बालबिम्बं कारयित्वा।तदङ्कुरार्पण पूर्वकं जले अधिवास्य।कुम्भस्थापनाधिवास होमादि कृत्वा। बालगेहस्य मध्ये दिव्येंशे

वा हस्तमात्रसमुच्छ्रितां मेखलात्रययुतां वेदिकां कल्पयित्वा। प्रभाते सुमुहूर्ते शक्तिन्यास चतुर्थस्नपन वर्जम् तस्यां देवं यथाविधि संस्थाप्य। संप्रोक्ष्य। मन्त्रान् विन्यस्य संपूजयेत्। ततः

आमूलधामप्रारम्भात् आसमाप्तेः हरे विभो।
पूजां गृह्णीष्व भगवन् अस्मिन् त्वं बाल मन्दिरे।
शमयन् मूलधिष्ण्यस्य विघ्नकृद्दैत्य संहितम्।

इति मन्त्रेण प्रार्थ्य।विज्ञाप्य प्रणम्य।चण्डप्रचण्ड क्षेत्रपाल खगेशान् द्वारे इन्द्रादि लोकपालान् तत्तद्दिक्षु ईशान भागे सेनेशं नैऋते गणेशं च अशरीरिणः सर्वान् एतान् बालमन्दिरस्य परितः हस्तमात्रातु मेखलात्रययुतासु वृत्तासु चतुरश्रासु वा वेदिकासु स्थण्डिले वा तादृशे संपूज्य।सर्वान् कुमुदादिगणान् महापीठे अभ्यर्च्य। गुरुः एवं बालालयं प्रतिष्ठाप्य। अन्ते ध्वजारोहणपूर्वकं पुष्पयागावसानिकं उत्सवं अथवा एकाहोत्सवं कुर्यात्। बालबिम्बं लोहजं चेत् तेनैव सकलं नित्यादि कर्मकुर्यात्। उत्सवार्थं न चेत् बिम्बं बालेनैव कुर्यात्। बालबिम्बं शिलादारुजमयं चेत् दारुसंग्रह शिलासंग्रह पूर्वकं बालबिम्बं प्रतिष्ठापयेत्।

आलय निर्माण विधिः

पश्चात् रथकारः स्थपतिभिः सह मन्दिरनिर्माणमारभेत। तत्र मुख्य मध्यमाधम सञ्चितासञ्चितोपसञ्चित कल्पन भेदं शिलेष्टकादार्वादिषु गर्भादि दोष लक्षणानि देवतान्तरालयगतत्वादि दोषान् च सम्यक् ज्ञात्वा मूलमन्दिरं कल्पयेत् ।

खातभूतले जलेन समतां वीक्ष्य प्रकृतिं क्षितौ विन्यस्य। शास्त्र चक्षुषा प्रथमां फलकामादाय । सुधया तां दृढीकृत्य। जलेन समतां वीक्ष्य । तस्योपरि उपपीठं तदुपरि अधिष्ठानं उपपीठेनविना अधिष्ठानं वा परिकल्प्य । अधिष्ठानं वा यद्वा पूर्वमधिष्ठानं

तदुपरि उपानहं तदुपरि पादं ततः प्रस्तरं पश्चात् ग्रीवां तदनु शिखरं एवं यथाक्रमं एकतल कल्पने यथावत्स्थूपि एवं कुर्यात् । द्वितल कल्पने तु अधिष्ठान चरण प्रस्तरकूटशाला संस्थान पञ्जर प्रस्तर वेदिकाग्रीव शिखराणि एवं क्रमेण त्रितलादि आद्वादश तलमेवमेव। ततः अधिकेषु उपानजगती कुमुदपट्टिका कण्ठपट्टिका महतीपट्टिका वाजन वेदिका चरणतलोत्तर हंसमाला कपोत प्रतिप्रतिवेदिका कण्ठशिखराणि इति एवं अष्टादशा' कल्पनमिति यावत्स्थूपि यजमानानुगुण्येन वा कुर्यात्। पूर्वमेवं सर्वं यथाविधि पटादौ निर्माय अनन्तरं मन्दिर निर्माणं च कुर्यात्।

इति श्री वराहगुरुणा विरचितायां क्रियाकैरव चन्द्रिकायां
बालालयप्रतिष्ठाविधिः नाम तृतीयः परिच्छेदः

****

अथ चतुर्थः परिच्छेदः

प्रथमेष्टका विधिः

अथ प्रथमेष्टका विधिः उच्यते-

आदौ तावत् आचार्यः शास्त्रोक्तवर्त्मना प्राचीपरीक्ष्य।प्राच्यादि विभागेन द्वाराणि कल्पयित्वा। चतुर्विंशत्यङ्गुलायतं द्वादशाङ्गुलायतं वा अङ्गुष्टपरिणाहं शुभं ऋजुं क्षीरवृक्षजं शङ्कुंसमानीय। प्रासादस्थान मध्यभागे मूलमन्त्रेण संस्थाप्य। शङ्कुद्विगुणमानेन परितः मण्डलान्ते पूर्वापराङ्गयोः छायामालोक्य। छायान्तर्मण्डलान्ते पूर्वतः पश्चिमतः बिन्दुद्वयं विलिख्य। तयोः मध्यतः पूर्वबिन्दुमारभ्य अपरबिन्दुपर्यन्तं सूत्रमापात्य।तयोरन्तरं यथा कच्छपानन पुच्छवत् भवेत् तथा विधाय। तदन्वेवमेव उत्तरतः दक्षिणतश्च कृत्वा। एवं चतसृषु दिक्षु च त्रि पञ्च सप्तहस्तं यथाभिमतंअधिकं वा

सूत्रं निपात्य।दिक्सूत्रभ्रमणेनैव यथा चतुरश्रं भवेत् तथासमालिख्य। दिक्षु अष्टासु यथान्यायं शङ्कून् संस्थापयेत्। शङ्कुस्थापनवेलायां निमित्तानि परीक्षेत्। शुभानि चेत् शुभं फलं।विपरीतानि चेत् शान्तिमाचरेत्।

स्थितासन शयन यान विश्वरूप बिंबानुगुण्येन चतुरश्र वृत्त वृत्तायत चतुरश्रायत भेदान् ज्ञात्वा। यजमानः भुक्तिकामश्चेत् युग्मैःहस्तैः, मोक्षार्थी यदि अयुग्मैः एकहस्तमारभ्य दशहस्त पर्यन्तं यथाभिमतं प्रासादं द्वादशाङ्गुलान्तं यथावित्तानुसारतः मानयित्वा। तत्रविमानं च निर्माय प्रथमेष्टकां आरभेत्। इष्टका शिला काष्ट मृण्मयभेदेन त्रिविधा।विमाने शैलजे शिलया, काष्ठजे काष्ठेन, पक्वेष्टकामये सुपक्वेष्टकया, आमेष्टकामये च आमेष्टकया, शैलाकाष्टमये शिलाकाष्ठमये च शिलया, इष्टकाकाष्ठमये धाम्नीष्टकया च प्रथमेष्टकया कार्या। प्रतिमार्थं शिलासंग्रह कल्पेन शिलां संगृह्य ।तासु पुल्लिङ्गादिपरीक्षां कृत्वा। पुल्लिङ्गशिलया पादादि स्थूप्यन्तं, स्त्रीशिलया प्रथमेष्टकां,नपुंसकशिलया मूर्धेष्टकां च कुर्यात्।

दार्विष्टकाःअपि प्रतिमा दारुसंग्रहवत् ग्राह्याः। विपरीतकरणे महान् दोषः। राजराष्ट्रक्षयश्च। छेदे कांस्य घण्टाध्वनिः मूर्ध्नि, मध्ये कांस्यध्वनिः, मूले तालध्वनिः यस्यां सा पुंशिला।तस्मात् किंचिदूनध्वनिः स्त्री शिला। नादहीना नपुंसकशिलाभवति।

अथ मृण्मयेष्टकाविधिः - पूर्वमाचार्यः रथकारनिर्दिष्टं देशं समासाद्यंतत्रपुण्याह पूर्वकं अग्निंप्रतिष्ठाप्य। ज्वलिते अस्मिन् मूलमन्त्रेण अष्टोत्तरशताहुतीः आज्येन चरुणा पुरुषसूक्तेन षोडशाहुतीः समिद्भिः अष्टोत्तरशतसंख्यकाभिः भूयोपि च मूलमन्त्रेण हुत्वा। चरुणा विष्णु पारिषदान् उद्दिश्य, क्षेत्रपालाय, भूतेभ्यः, वास्तुनाथाय,देवेभ्यः, ऋषिभ्यः,देवगणाय इति च आज्येन स्वाहान्ताभिः भूरादि सप्तव्याहृतिभिश्च हुत्वा। पूर्णाहुतिं च हुत्वा । पूर्वादिषु चतसृषु दिक्षु ‘‘विष्णु पार्षदेभ्यः सर्वभूतेभ्यः वास्तुनाथाय क्षेत्रपालाय’’ इति नमोन्तैः एतैः मन्त्रैः चरुणा बलिं च कृत्वा।

अग्निमुद्वास्य। कुलालेन इष्टकाः कारयेत्। तास्वपि च ऋजुः युग्मा रेखा यस्यां सा पुरुषेष्टका प्रथमा। तिरश्चीना युग्मा रेखा यस्यां सा स्त्रीष्टका द्वितीया । नीरेखा पार्श्वयोः वक्ररेखा वा नपुंसकेष्टका तृतीया। प्रासादादिकरणे प्रथमा । पीठादिकरणे द्वितीया। प्रासाद गर्भाधानादि करणे तृतीया । तदायामस्तु हस्तमानः चेत् उत्तमः। अष्टादशाङ्गुलायामः मध्यमः । षोडशाङ्गुलायामः अधमः। आयामार्धेन विस्तारः। विस्तारार्धेन घनम् । आयाम समविस्तारास्यात् आच्छादनेष्टका । इदं महामानम्प्रासादतुल्यः विस्तारः। तद्विगुणःआयामह इदम् अल्पमानम्। एवमिष्टकाः कारयित्वा।ताः पक्काः शुभाःदृढाः संपादयेत्। देवालये चतस्रः प्रथमेष्टकाः। मनुष्यालये पञ्च पक्केष्टकामये धाम्नि पक्का प्रथमेष्टका इत्यादि वेद्यम्। ततः मण्डपं प्रपां वा कल्पयित्वा। वितानादिभिः अलङ्कृत्य। तन्मध्ये सप्ततालायतां हस्तमात्रसमुच्छ्रितां वेदिकां कल्पयित्वा। मृत्संग्रहणपूर्वकं अङ्कुरान् अर्पयित्वा। ततः वेदिकामध्ये शालीनां भारचतुष्टयेन तदुपरि तदर्धेन तण्डुलानां तस्योपरि तदर्धेन तिलानां स्थण्डिलं कृत्वा। अन्तरान्तरयोगेन आहतैः वासोभिः आच्छाद्य। तदुपरि सलक्षणान् सूत्रवस्त्रादिवेष्टितान् सरत्नहेमकूर्च पिप्पलदलान् कुम्भान् नव विन्यस्य। तद्वेदिकोत्तरभागे पूर्ववत् धान्यपीठं परिकल्प्य। इष्टकाधिवासार्थं दर्भानास्तीर्य। पुण्याहं वाचयित्वा। स्नपनार्थं पूर्वोक्तलक्षणयुक्तान् नव कलशान् धान्यपीठे संस्थाप्य। ब्रह्मादि ईशानान्तं घृतक्षीर दधिगुड पञ्चगव्य फलरस गन्धलोह मधुभिः संपूर्य। वस्त्रेण आवेष्ट्य। क्रमेण परवासुदेव पुरुष सत्याच्युत अनन्त केशव नारायण माधव गोविन्दान् आवाह्यअभ्यर्च्य। चतस्रः स्त्रीलिङ्गेष्टकाः समादाय। पुण्याहपुरस्सरं वासुदेवादीन् आवाह्यअभ्यर्च्य। पीठे संस्थाप्य। पयोव्रतसाम्ना पयसा, मधुवातेति गुडेन, याःफलिनीरिति फलवारिणा, हिरण्यगर्भ मन्त्रेणलोहवारिणा, दधिक्राविण्णेतिदध्ना,पञ्चवारुणिकेति पञ्चगव्येन,गन्धद्वारेति गन्धांबुना, मधुवातेति मधुना, घृतस्नाते तिसाम्ना घृतेन च

अभिषिच्य। पृथक् पृथक् इष्टकाः सदर्भेन वस्त्रयुग्मेन संवेष्ट्य। पुण्याहं वाचयित्वा। प्रोक्ष्य। इष्टकाःशयनेअधिवास्य.पूर्वादिद्वारेषु तोरण कुम्भान् संस्थाप्य। तत्तद्देवतानि आवाह्यअभ्यर्च्य। पूर्वस्थापित मध्यकुम्भे परमात्मानं उपकुम्भाष्टके विष्णवादीन् आवाह्य अभ्यर्च्य। पायसगुडोदनानि निवेद्य। तस्य पूर्वे उत्तरे वा कुण्डौ स्थण्डिले वा अग्निमानीय। समिदाज्य चरुभिः यथाविधि च पुनः समिदाज्य तिल पुष्पैः पृथक् अष्टोत्तरशताहुतीः च नृसूक्तेन चरुणा च हुत्वा। संपाताज्यं पात्रान्तरे संगृह्य।तेन इष्टकाः स्पर्शमन्त्रेण संस्पृशेत्।

प्रतिसरः

अथ प्रतिसरबन्ध कर्मकरिष्ये इति संकल्प्य। प्रतिसरं पुण्याहजलेन प्रोक्ष्य।हेममयैः कार्पासमयैः वा प्रतिसरैःअस्त्र मन्त्रेण संबध्य।'ओं ह्रीं स्वं स्वप्नाधिपतये स्वाहा इति मन्त्रेण सर्पिषा अष्टोत्तरशताहुतीः हुत्वा। ततः आचार्यः यजमानेन सह दर्भशय्यायां स्वप्नार्थं शयीत। स्वप्ने शुभे शुभं फलम्। अशुभे शान्ति होमं कृत्वा। विभातायां विभावर्यां शुभे मुहूर्ते ऋत्विग्भिः सह इष्टकाः समादाय। धामप्रदक्षिणी कृत्य। अन्तः प्रविश्य। क्लृप्त द्वारदेशस्य दक्षिणतः पादमूले वेदघोषैः वाद्यघोषैः च सह निक्षिपेत्। प्रादक्षिण्येन इन्द्रादि सोमान्तं इष्टकाः मूलमन्त्रेण श्रियःमन्दिरे श्री सूक्तेन निदध्यात्। दक्षिण पश्चिमयोः मूलं पूर्वोत्तरयोः अग्रं च कुर्यात्।उपानत् विषमो यथा न भवेत् तथा निदध्यात्। सर्वं कर्मा पुण्याहपुरस्सरं निदध्यात्। तदा यजमानः गुरवे वस्त्राभरणपूर्वां शतनिष्कपरिमितां दक्षिणां तदर्धं ऋत्विग्भ्यः तदर्धं परिचारकेभ्यश्च दद्यात्।

इति प्रथमेष्टका विधिः नाम चतुर्थः परिच्छेदः

****

पञ्चमः परिच्छेदः

गर्भन्यासः

अथ गर्भन्यासविधिः उच्यते-

पूर्ववत् समध्यवेदिकं कल्पयित्वा। मध्यवेदिकां गोमयेन उपलिप्य। तस्यां भारचतुष्टयपरिमितया व्रीह्या तदुपरि तदर्धेन तण्डुलेन तदुपरि तदर्धेनतिलेन च अन्तरान्तरयोगेन वस्त्राच्छादन सहितं स्थण्डिलं कृत्वा। मध्ये वस्त्ररत्नलोह कूर्च पिप्पलदलपिधानं महाकुम्भं परितः ताम्रजान् अष्टौ कुम्भान् च संस्थाप्य। गन्धोदकैः आपूर्य। मध्यकुम्भे शङ्ख चक्र गदाखड्ग शार्ङ्ग मुसलानि सौवर्णानि निदाय। तस्मिन्''ओं ह्रीं वसुधायैनमः'' आगच्छ आगच्छ इति वसुधां आवाह्य। गन्धादिभिः अभ्यर्च्य। कुम्भेषुअष्टासु च इन्द्रादीन् आवाह्य। अभ्यर्च्य। पर्वत ह्रद पुण्यतीर्थ वल्मीक कर्कटाशयन नदी वृष वृषाणाग्र दन्तीदन्त पयोनिधि हल संस्थिताः मृत्तिकाः दश च कुमुदारविन्द कशेरूत्पल नीलोत्पलानां पञ्च कन्दान् मनश्शिला हरितालाञ्जन श्याम सीस सौराष्ट्र रोचन गैरिक पारदान् सप्तधातून्, वज्र वैदूर्य मौक्तिक स्फटिक पुष्यराग चन्द्रकान्त महानील पद्मराग शङ्खाभिधानानि नवरत्नानि, शालि नीवार कङ्गु प्रियङ्गु तिल माष मुद्ग यव वैणवानि नव बीजानि हिरण्य रजत ताम्रायस त्रपु सीस सौवर्ण कूर्म शङ्ख चक्राणि नवैतानि च संगृह्णीयात्। सौवर्णं राजतं ताम्रमायसं वा गर्भपात्रं अलाभे दारुजं वा षोडशाङ्गुलायतं द्वादशाष्ट चतुरङ्गुलान्यतम विस्तारं तदर्धोच्छ्रायं पदचतुष्टयेन उपेतं तत्त्रितयेन वा सापिधानं वृत्तं चतुरर्धं वा तन्मध्य गर्तानां षोडशभिःनवभिर्वा कारयित्वा। पुण्याहं वाचयित्वा। प्रोक्ष्य। पञ्चगव्येन प्रक्षाल्य। वेदिका संस्थित नवकुम्भ जलैः वेदादिना अभिषिच्य। तस्यामेव वेदिकायां पूर्ववत् स्थण्डिलं कल्पयित्वा। सदर्भवस्त्रेण तद्भाजनं आवेष्ट्य वेदिका मध्ये निदध्यात्। षोडशसु तद्गर्तेषु सुवर्णादीनि समुद्रमृदन्तानि द्रव्याणि, तदभावे केवलं सुवर्णं वा विन्यसेत्। नवगर्त विधाने तु नवसुगर्तेषु च समुद्रिक मृदं पूर्वं आपात्य। प्राचीन गर्ते पर्वतमृदुत्पलकन्द मनश्शिला

वज्रशालि हिरण्यानि, दक्षिणे तीर्थमृद कन्द हरिताल वैदूर्य नीवार राजतानि, पश्चिमे नदीमृत्मरतक नीलोत्पलकन्दाञ्जनकङ्गु ताम्राणि, उत्तरे ह्रदमृत्कशेरु कन्द पुष्यराग प्रियङ्गु-अयांसि, आग्नेयेकुलीराशय मृत्सीस स्फटिकमाषत्रपूणि, नैऋते वल्मीकमृत्सौराष्ट्र मौक्तिक तिलकांस्यानि, मारुते हलमृत्तिका रोचनाचन्द्रकान्त मुद्ग सौवर्ण कूर्मप्रतिकृतीः, ऐशाने दन्तिदन्तमृत्तिका महानीलगैरिक वेणुधान्य सौवर्ण शङ्खान्, ब्रह्मपदे वृषविषाणाग्र मृत्तिका पद्मकन्द पद्मराग पारदयव सौवर्ण चक्राणि च मूलमन्त्रेण विन्यस्य। तत्पद्मं विष्णुगाय र्त्या अभ्यर्च्य। कुण्डेस्थण्डिले वा अग्निं विधिवत् उपसमिध्य। समिद्भिः सर्पिषा च विष्णुषडक्षरेण अष्टोत्तरशताहुतीः हुत्वा। पात्रान्तरे संपाताज्यं संगृह्य। चरुणा नृसूक्तेन षोडशाहुतीःहुत्वा। अनन्तरं तिलाज्यमिश्र चरुणा. 'इन्द्रादि लोकपालेभ्यः, भुवनेभ्यः, पर्वतेभ्यः, समुद्रेभ्यः, आदित्येभ्यः, वसुभ्यः, मरुद्भ्यःऋषिभ्यः, वेदेभ्यः, सर्वशास्त्रेभ्यः.पुराणेभ्यः, पातालेभ्यः, दिग्भ्यः,नागेभ्यः, गणेभ्यः, सर्वभूतेभ्यः, नरेन्द्रेभ्यः, नक्षत्रेभ्यः, सर्वेभ्यः ग्रहेभ्यः इतिप्रणवादि स्वाहान्तं हुत्वा। पूर्वगृहीत संपाताज्येन गर्भभाजनं''ओं धीं नमः पराय लोहितवर्णाय स्पर्शतन्मात्रात्मने'' इति संसिच्य। पूर्णाहुतिं हुत्वा। रजन्यां सुमुहूर्ते सवेद वाद्यघोषं तद्भाजनमादाय। देवागारं प्रदक्षिणी कृत्य। गर्भगेहम् प्रविश्य। द्वारस्य अन्तर्मुखस्य दक्षिण पार्श्वं त्रिभागी कृत्य। भागद्वयं विसृज्य। द्वारनिकटस्येकभागे पादपार्श्वे देवानां पट्टिकायां ब्राह्मणःयजमानश्चेत्, राजा चेत् कुमुदोपरि, वैश्यः यदि कुमुदाधः, शूद्रः यदि जगतौ गर्भन्यासं कुर्यात्। उक्तविपर्ययन्यासे महान् दोषः भवति। तस्मात् स्थानभ्रंशं न कारयेत्।

तदा आचार्यः भूमण्डलं सपर्वत द्वीप समुद्रदिग्गजं शेषफणीन्द्र फणामण्डलस्थितं ध्यात्वा। द्विभुजं श्यामां सर्वाभरण भूषितां ऋतुस्नातां वसुधां आत्मानमपि सर्वभूषणभूषितं केशवं ध्यात्वा।गर्भभाजन स्थानगर्तं गोमूत्रेण अनुलिप्य।

सर्वभूतधरे कान्ते पर्वतस्तन मण्डिते।

समुद्रपरिधानीये देवी गर्भं समाश्रय।''

इति मन्त्रेण तस्मिन् गर्ते गर्भभाजनम् विन्यस्य। विधानेन पिधाय।

सुधया धृढीकृत्य। समन्ततः रक्षां कुर्यात्। तदा गर्भस्य स्खलने दुर्निमित्ते च पूर्ववत् प्रायश्चित्तं कुर्यात्। गर्भ न्यासम् अकृत्वा ग्रामं प्रासादं वा कुर्यात् यदि, तदा नचिरादेव उभौक्षयं यायाताम्।तदानीं यजमानः गुरवे पूर्वोक्त संख्यया दक्षिणां दद्यात्।

इति गर्भन्यास विधिःनाम पञ्चमः परिच्छेदः

****

अथ षष्ठः परिच्छेदः

मूर्धेष्टका (कवाटस्थापन) विधिः

मूर्धेष्टका (कवाटस्थापन) विधिः उच्यते

पूर्वे मण्डपं प्रपां वा मध्ये वेदिकाद्वयेन सह कल्पयित्वा। मध्यवेदिकायां पूर्ववत् व्रीहि शालि तण्डुल तिलैः सवस्त्राच्छादनं स्तण्डिलं कृत्वा। तस्मिन् पूर्वोक्त लक्षणयुतान् नवकुम्बान् पुण्याहपूर्वकं संस्थाप्य। इष्टकाधिवासार्थं द्वितीय वेदिकायां च स्थण्डिलं पूर्ववत् कृत्वा। दर्भान् आस्तीर्य। मूर्धेष्टका शुद्ध्यर्थं स्नपनकर्मकरिष्ये। इति संकल्प्य। पुण्याहं वाचयित्वा। तत्र नवकलशान् सलक्षणान् संस्थाप्य। तान् च पूर्वोक्त विशेषेणविशिष्टान् विधाय।ब्रह्मादि ईशानान्तं पूर्ववत् घृतादि द्रव्यैः आपूर्य। तेषु पूर्ववत् तदधिदैवतानि आवाह्य अभ्यर्च्य। नपुंसकेष्टकाः चतस्रः संगृह्य। पुण्याहं वाचयित्वा। प्रोक्ष्य। तेषु वासुदेवादीन् आवाह्य अभ्यर्च्य। पीठे संस्थाप्य। नवकलशैः तत्तन्मन्त्रेण ताः क्रमेण पृथक् अभिषिच्य। सदर्भ नव वासोभिः पृथक् पृथक् संवेष्ट्य। पुण्याहं वाचयित्वा। प्रोक्ष्य।पूर्वकृत द्वितीयवेदिका स्थण्डिलोपरि ताः शाययित्वा।पूर्ववत्

द्वारतोरण कुम्भान् संस्थाप्य।तत्तद्दैवतानि आवाह्य अभ्यर्च्य।मध्यवेदिकाकुम्भेषु मध्ये परमात्मानं उपकुम्भाष्टके विष्ण्वादीन् आवाह्य अभ्यर्च्य।पायसान्नं निवेद्य।वेदिकायां चतसृषु दिक्षु अधिवासहोमं धान्नः अष्टसु दिक्षु शान्ति होमं च कृत्वा।संपाताज्यं संगृह्य।तेन स्पर्शमन्त्रेण ताः स्पृष्ट्वा।पूर्ववत् संकल्पादि पूर्वसूत्रैः प्रतिसरं बध्नीयात्।ततःपञ्चविंशति कलशस्नपन कर्मकरिष्ये। इति संकल्प्य।पुण्याहं वाचयित्वा।प्रोक्ष्य।पूर्वायतानि दश उदकायतानि तावन्ति सूत्रानि निपातयेत्।तदाकृते एकोत्तराशीति पदानि भवन्ति।तेषु मध्यपद नवके कुम्भ नवकं तत्परितः द्वेद्वे पङ्क्ति वीध्यर्थं परिमाज्र्य। तद्बहिः पूर्वादिसोमान्तं दिक्षु त्रीणि त्रीणि आग्नेयादीशानान्तं एकैकं कुम्भानां व्रीहि तण्डुल तिलकृतस्थण्डिलोपरि विन्यस्य। मध्यकुम्भनवकं घृतोष्णोदक नवरत्न फलसप्तलोह मार्जन गन्धाक्षत यवैःब्रह्मादीशानान्तं क्रमेण आपूर्य।पूर्वादि दिक्स्थमध्य कुम्भान् चतुरः क्रमेण पाद्य अर्घ्य आचमन पंचगव्यैः आग्नेयादि कोणस्थितान्चतुरः दधिक्षीर मधु कषायैः पार्श्वस्थित कुम्भाष्टकं शुद्धोदकेन च आपूर्य।पूर्वोक्त विशेषेण विशिष्टान् आधाय। द्रव्यकुम्भेषु परवासुदेवादि दामोदरान्तान् शुद्धोदक कुम्भेषु नारायणं च आवाह्य।अभ्यर्च्य। ततः यजमानः आचार्यः स्नात्वा वस्त्राङ्गुलीयकादिभूषणैः भूषितः उपोषितः। तत्र दर्भान् आस्तीर्य। परमपुरुषं ध्यायन् शायीत।श्वभूते सुमुहूर्ते कृतकृत्यः गुरुः इष्टकाः पञ्चविंशतिकलशैः मूलमन्त्रेण महाकुम्भतोयेन च स्नापयित्वा अभ्यर्च्य।मूलेन जलैः वासोभिः वेष्टयित्वा। सर्वालङ्कृतानां ऋत्विजां मूध्नि विन्यस्य। सवेदवाद्यघोषं धामप्रदक्षिणी कृत्य।विमानोपरितले इष्टकाः आरोप्य। पुण्याहं वाचयित्वा।आचार्यः प्राङ्मुखः हृदयकमले नारायणं ध्यायन् पूर्वादि दिक्रमेण प्रणवेन इष्टकाः स्थापयेत्। तदानीं पापरोगयुतान् प्रतिलोमजान् अपि बहिः निर्वासयेत्।तदनु यजमानः शिरसा गुरुं

प्रणम्य।गो भू हिरण्य भूषणदासीदास वाहन छत्र चामर पादुकादीन् महादक्षिणां च दद्यात्।रथकारं च तथा वस्त्रान्नधनदान्यादिभिः तोषयेत्।

अत्र स्थूपिकाकील विधिः उच्यते ।

सौवर्ण राजतं ताम्रं वा दारुजं वा वक्र ग्रन्थि वर्जितं स्थूपिका कीलं मूर्धभूम्यङघ्रि प्रमाण विस्तारायामं भवेत्।तदग्रमङ्गुली प्रमाणं विमान कण्ठतुल्य प्रमाणं अध्यर्ध प्रमाणं द्विगुण प्रमाणं वा वृत्तं चतुरश्रं पञ्चाश्रं वा कल्पयेत् । वृत्तायते चतुरश्रायते च विमाने स्थूपिकाकीलानि युग्मानि स्युः;इतरेषु विमानेषुअयुग्मानि।विंशति यावत् युग्मानि;एकोनविंशतिं यावत्अयुग्मानि चतुरश्र षडश्राष्टाश्र वृत्तेषु धामसु स्थूपिकाकीलं एवमेवस्यात् एवं कीलं कृत्वा। आचार्यः तस्य मूर्धेष्टका विधिवत् अधिवास स्नपनादि आरोपणान्तं सर्वं कर्म कृत्वा।कीलं विमानाग्रं प्रापय्य।

ततः आचार्यः तत्र पुण्याहं वाचयित्वा। स्थूपिका गर्ते नवरत्नानि धातु लोहबीजानि च यथाविधि निक्षिप्य। स नववस्त्र उत्तरीयः धृत पञ्चाङ्ग भूषणः प्राङ्मुखः मूलमन्त्रेण स्थूपिका कीलं गर्ते संस्थाप्य। सुधया धृढीकृत्य। ततः विमानदिग्देवता कल्पनं कुर्यात्।तदनु यजमानः यथावित्तं आचार्यं मूर्तिपानां दक्षिणां दद्यात्

अथ शिखाकुम्भं

सौवर्णं राजतं ताम्रं पैत्तलं मृण्मयं वाशिखाकुम्भं वृत्तेधाम्निवृत्तं अश्रे अश्रं संस्थाप्य। तं नानारत्नैःलोहैः च आपूर्य।तदग्रं मुकुळाकृतिं दीपाकृतिं वा कल्पयित्वा।ततः विकच कमलाकृतिं कुर्यात्।

अथ विमानदिग्देवता कल्पन विधिः

विमानस्य ऐन्द्र्यां श्यामलं इन्द्रं रक्तं कुमारं वा दक्षिणस्यां रक्तवर्णं उमापतिं दक्षिणामूर्तिं वा प्रतीच्यां श्वेतवर्णं नृहरिं श्रीधरं वा उदीच्यां कनकवर्णं ब्रह्माणं धनपतिं वा अथवा पुरुष सत्य अच्युताऽनन्तान् यद्वा श्याम रक्त कनकश्यामळ वर्णान् वासुदेव संकर्षण

प्रद्युम्न अनिरुद्धान् यदिवा नर नारायण हरि कृष्णान् आहोस्वित् वराह नृसिह्म श्रीधर हयवक्त्रान् एतान् चतुर्भुजान् शंखचक्रधरान् ब्रह्माद्यान् अपिस्वायुध धरान् ध्रुव भेरेस्थिते स्थितान् आसीने आसीनान् शयिते तु स्थितान् आसीनान् वा यानारूढे यानारूढान् स्थितान् वा विश्वरूपे विश्वरूपान् स्थितान् वा चतुर्भुजान् इन्द्रादीन् च सर्वेष्वपि प्राकारेषु आसीनान् विमाने शैलजे शैलजान् कुर्यात्।तेषां जलाधिवासादि शयनाधि वासान्तं कर्म यथाविधि कृत्वा।

सुमुहूर्ते स्वस्व स्थानेषु संस्थाप्य।वर्णलेपनं कुर्यात्।इष्टकामये धाम्नि तु शूलानां जलाधिवासादि शयनाधिवासान्तं कर्म कृत्वा।स्वस्वस्थानेषु संस्थाप्य।त्रिवस्तुकमयं कृत्वा।यस्य यः वर्णःविहितः तेनैव रञ्जयेत्।ते सर्वे भित्तिमागस्ताः सपद्मविष्टरः अर्धचित्राः आभास चित्राः वा कल्पनीयाः।

एक नासायुते धाम्नि दिङ्मूर्तिरपि एकैव । नासिकाहीने तु दिङ्मूर्तिः न इष्यते ।

चतुरश्रायते वृत्ते वृत्तायते च धाम्नि आग्नेयादिषु विदिक्षु क्रमेण वीरसेन सुषेण भद्र सुभद्रका बाहुभिः चतुर्भिः सद्मधारिणः स्थाप्याः।चतुरश्रायते धाम्नि दक्षिणोत्तरतः नासिका द्वययुते पूर्णपुष्करौ शंखचक्र धरौ यवनिकां स्पर्शि हस्तौ कल्पनीयौ।विमानस्य प्रतितलं नृत्यतः सुरविद्याधरान् किन्नरोरगान् वीणा पणवधारिणश्च सर्वत्र भगवदवतारान् च वृत्तेः उपरि कण्ठस्य अधस्तात् कोणेषु चतुर्षु कनक वर्णं गरुडं सिह्मं वा कण्ठमात्रोन्नतं पादमात्रोन्नतं अध्यर्धोन्नतं त्रिपादमात्रोन्नतं वा कल्पयेत्।अधस्तात् विमानाधिष्टाने आग्नेये स्थितं हस्ति वदनं दक्षिणस्यां शोणमीशं ऋषिभिः सेवितं दक्षिणामूर्तिं वा प्रतीच्यां विश्वरूपं उत्तरे कमलासनं कनक वर्णं ऐशान्यां महिषासुरमर्दिनीं अथवा पूर्ववत् सर्वाऽपि दिङ्मूर्तिः तस्य अधस्तात् उपपीठेऽपि पूर्ववत् अथवा तत्कर्तोपेतान् प्रादुर्भावान् प्रकल्पयेत्।

पाषाण शर्करा तक्रसुधया त्रिप्रकारया त्रिफलांम्भोभिःत्रिवारं द्विवारं एकवारं वा पिष्टया खादिरार्जुन शाल्मली क्षीरशाखिनांकषायांभोभिः तथा कृतया घटे भूयः पिष्टया माषीयत्वक्कात मिश्रया गुडपाकरसैः सैकतैः च पुनः भृशंकुट्टितयाधाम स्थूल सूक्ष्मरूप पराख्येन त्रिविधेन क्रमेण लिम्पेत्।एवं कृतेधाम चिरस्थायी भवति।पाषाण शर्करातक्रसुगन्धचूर्णं द्विगुणवालुकया युक्तं संयक् पिष्ट्वा कुर्यात्।एकवारं क्षुण्णं स्थूलं,द्विवारं क्षुण्णं सूक्ष्मं,त्रिवारं क्षुण्णं परम्।एवं क्रमेण लेपनक्रमःतद्धाम पञ्चवर्णैः यथाविधि शोभितं कृत्वा। उपानदादि स्थूप्यन्तं कनकादिभिः भूषयेत्।

अथ कवाट स्थापन विधिः उच्यते

कवाटद्वार शाखाः समानीय।''ओं लां नमः पराय सर्वात्मने''इति संक्षाळ्य। पुण्याहं वाचयित्वा।कवाटद्वारशाखाः चतस्त्रः पञ्चोपनिषन्मन्त्रेण अद्भिः संप्रोक्ष्य।अहतैः वासोभिः आच्छाद्य। पूर्ववत् धान्यराशिं कृत्वा।तत्र कवाटद्वार शाखाः संस्थाप्य।कुम्भस्थापनार्थं च पूर्ववत् स्थण्डिलं कृत्वा।तत्र सरत्नलोह कूर्चाऽश्वत्थपल्लवापिधानं सकरकं महाकुम्भं मध्ये तत्परितः तादृश विशेषण विशिष्टं कलशाष्टकं च क्रमात् विन्यस्य।द्वारतोरण कुम्भेषु तत्तद्दैवतानि आवाह्य। अभ्यर्च्य।पुण्याहवाचन पुरस्सरं अधिवासहोमं कृत्वा।प्रभाते गुरुः कवाट आधारशिलागर्तयोः पूर्ववत् रत्नन्यासं विधाय। तदुपरि कवाटाधारशिले संस्थाप्य।पुण्याहं वाचयित्वा। आधारशिले पञ्चगव्येन प्रक्षाळ्य।सुलग्ने कवाटे संस्थाप्य। महाकुम्भस्त कूर्चेन कवाटयोः देवता विन्यासं कारयेत्। तत्क्रमः-

अधश्शाखायां शान्ति दक्षिण शाखायां वाग्देवीं उपरि श्रियं औत्तर शाखायां रतिं दक्षिण कवाटे विश्वदृग्भूतनाथौ उत्तरे विश्ववक्र प्रतापवन्तौ च । तत्रस्थाःमत्स्यादि दशमूर्तिः स्वस्व विद्यया प्रोक्ष्य।वेत्रेषु वेदशास्त्र पुराणानि नाराचेषुत्रयस्त्रिंशत् देवताः कीलेषु ऋषीन् कवाट पट्टिकायां भूतनाथं कवाटकन्द पट्टे विश्वभावनं च प्रणवादि

नमोन्तैः स्वस्व मन्त्रैः महाकुम्भजलैःन्यसेत्। ततःआचार्यादिभ्यः यथाविभवं दक्षिणां दद्यात्।

इति मूर्धेष्टका (कवाटस्थापन) विधिः नाम षष्टः परिच्छेदः

****

अथ सप्तमः परिच्छेदः

शिला दारु संग्रह विधिः

शिलादारु संग्रहविधिः उच्यते

प्रतिमा रत्न लोह शिला मृद्दारु प्रकृति द्रव्य भेदेन षड्विधाः। आद्या माणिख्य रत्नकृत करचरणाद्यवयवयुता चित्ररूपा अर्धचित्ररूपा वा पटल त्रासादिदोषरहिता समर्चने सर्वकाम फलप्रदा। लोहजास्तु सुवर्ण रजत ताम्र रूप प्रकृति द्रव्य भेदतःत्रिविधाः। आद्या सर्व संपत्करी।द्वितीयावित्त यशो विजय विज्ञानकरी।तृतीया ऋद्धि शान्ति सौभाग्य दायिनी।शिलाश्च सित पाटलपीत कृष्ण भेदेन चतुर्विधाः। आद्या ब्राह्मणस्य, द्वितीया क्षत्रियस्य,तृतीया वैश्यस्य,तुरीया शूद्रस्य। यथाक्रमं मुख्याः उदीरिताः। अथवा एतः चतस्रः ब्राह्मणस्य।राज्ञः पाटल पीत कृष्णाः वैश्यस्य पीत कृष्णेः, तुरीयस्य कृष्णमात्रमिति गौणःअयं विधिः।शङ्ख चक्र गदा पद्म शक्ति वन्दनमालिका सिह्म मातङ्ग सारङ्ग वराहाङ्कुश कुण्डिका श्रीवत्स चामर छत्र ध्वज मत्स्य विहङ्गमतिल तण्डुल वालुकाः यासु दृश्यन्ते ताः शुभदाः। तासु गर्भवत्यः शिलाः अग्राह्याः। गर्भः तु अन्तः अवस्थितः दोषाः। माहिषं नवनीतं मेषश्रृङ्गचूर्णं कुरुविन्दचूर्णयुतं गोक्षीरेण सम्पेष्य शिलायां दारौ च लिम्पेत्। तदा गर्भः दृश्यते। वेदिका मण्डलावर्तकानि यासु शिथिलःध्वनिः स्पर्शो सत्यौष्ण्यं वा जायते ताः गर्भवत्यः इति मन्तव्यः। तं यत्नेन निरीक्ष्य उत्पाटयेत्। तस्यां मण्डले पाटले दृष्टे तत्र पाटलाः पांसवः पाटले श्वेतपङ्कजे

श्वेताः पांसवः कपिलवर्णे स्निग्धे च कमठः (कालायाम समये वर्णे स्निग्धे च तत्र कमठः) कपोत वर्णे गौली मञ्जिष्टवर्णे लोहित दर्दुरः पाण्डर वर्णं शुक्ल दर्दुरः रक्तपीते कच्छपः कुसुम्भ पीतवर्णं पीतो वर्षाभूः शुक्ल हेम वर्णं क्षुद्र विहङ्गमःकालावससमे वर्णे गोधा गुडवर्गे पाषाणः मधुवर्णे खद्योतः सारङ्ग वर्णे वृश्चिकः खड्गसन्निभं सलिलं नीले शलभःरक्षे फेनं कपिले मूषिकः कृष्णे कृष्णाहिः बालतृण सन्निभं मत्स्यःइति एवमादयः दृश्यन्ते। एवं गर्भं निश्चित्य रथकारः गर्भमुद्धरेत्। मोहात् लोभात् वा सगर्भ शिला दारुभ्यां प्रतिमाः यदि कृता तदाराजराष्ट्र यजमानानां विनाशःभवति । कृतेगर्भोद्धारे तद्दोष परिहाराय स्थापकः यथा विधि शांतिं कृत्वा ब्राह्मणान् भोजयित्वा। आशिषः वाचयित्वा।तेभ्यः दक्षिणां दध्यात्।यदि शीतळशिलया बिंबकरणं तदा तत्र देवस्य सान्निध्यं अचिरादेव भवति। शिलाच्छेदे तु यच्चिरःप्रदेशे कांस्य घण्टा ध्वनिः मूले च तालध्वनिः सा पुंशिला । किञ्चित् न्यून ध्वनिः यदि सा स्त्री शिला।नादहीना नपुंसकशिला भवति। बिंबं पुंशिलया पीठं स्त्रीशिलया कुर्यात्। रत्नन्यासं नपुंसक शिलायां कुर्यात्। श्रियादि देवीनां विदानं तु स्त्रीशिलया पीठं पुम्शिलया च कुर्यात्। रत्नन्यासं नपुंसक शिलायां कुर्यात्। सौम्या शीतला वैष्णवी महाफलप्रदा। कृष्णा आग्नेयी रौद्री रोगप्रदा। सौम्याग्नेयो भयात्मिका। ब्राह्मी वृष्टिकरी। धर्मकाले शीतळा प्रावृषि च उष्णा एकवर्णा शुद्धा शिला प्रतिमाविधौ ग्राह्या। संकीर्णा अनेक वर्णादुःखदा।प्रतिमा कृते प्रशस्त पर्वतेषु शिला ग्राह्या। तत्रापि भूगतां वर्जयेत्। या कुसुम वन संकीर्ना जलाशय समावृता सा भूः वारुणी तत्रत्य शिला कामदा। यस्याश्च उत्तरतः जलं दक्षिणे सस्य समृद्धानि क्षेत्राणि पश्चिमे क्षीर वृक्षः सा भूः माहेन्द्रि। तत्रत्या पुष्टिदा।बहुफलप्रदा च। यस्यां पूर्वतः दक्षिणतः च खदिर काश्मर्यादि भूरुहाः झिल्लिका टिट्टिभ गृद्र वराह आपदादयश्च यस्यांअन्तर्गतं अल्पजलं सा आग्नेयी।तत्रत्यास्वल्प विभवदा। या विभीतका द्विपादापमृगसिंह्ययुत त्यक्तोदका

तृणकण्ठ खद्रुम संवृतसावायवी. तत्रत्याशिला शून्यदा. नदीह्रद तटभूति भूमि चतुष्पाद ग्राम श्मशान वल्मीक लवणोदकामेध्य भूमिशबर चण्डालाधिष्टित शर्करोसरसंबाध निस्तृण जलवर्जित देवतालय समीप वातातप तप्तदेशेभ्यः शिलाः न ग्राह्याः।

पुण्यक्षेत्रे शुभे देशे बृह्म वृक्ष निरन्तरे।
कुश काशोदक युते कृष्णमृग निषेविते।
पद्मोत्पलसमाकीर्णे व्रीहिक्षेत्र निरन्तरे।
हिन्ताल पूगपुन्नाग नालिकेर समावृते।
तपस्वि जनसंबद्धे देशे ग्राह्याशिला भवेत्।

एवं वर्ज्यावर्ज्य गुणदोषादिकं विदित्वा । देश भू लिङ्ग वर्ण भेदाच जानीयात्। अथ आचार्यः यजमनानुगुणे शुभे दिने तेन साकं ब्राह्मणान् भोजयित्वा। तेभ्यः दक्षिणां च वितीर्य। रथकारेण स्थपतिभिः च शिलासंग्रह देशं समासाद्य। तत्र प्रपां कारयित्वा। तत्र विधिवत् अङ्कुरार्पणं च कृत्वा।तन्मध्ये वेदिकामुत्पाद्य।तस्यां व्रीहितण्डुल तिलैः स्थण्डिलम् च निर्माय। तस्मिन् मध्ये महाकुम्भं, तद्दक्षिणे करकं, तत्परितः कलशाष्टकं च ससूत्र वस्त्र वेष्टनं संस्थाप्य।''ओं षौं नमः परायपरमेष्ठ्यात्मने नमः'' इति सरत्न लोहाश्वत्थपल्लव कूर्चापिधानं विधाय। सहस्त्रारहुंफट् इति सिद्धार्थान् विकीर्य।पुण्याहं वाचयित्वाप्रोक्ष्य। चक्रमुद्रां प्रदर्श्य। अञ्जलिना प्रणम्य।मूलमन्त्रेण महाकुम्भे देवं, करकेसुदर्शनं, उपकुम्भेषु विष्ण्वादि मूर्तीश्च आवाह्य। परमान्नं निवेद्य। चतसृषु दिक्षु कुण्डेषु स्थण्डिलेषु वा पालाश समित्पुष्प फलाज्यद्रव्यैः पञ्चभिः मूलमन्त्रेण पृथक् अष्टोत्तरशताहुतीः चरुणा नृसूक्तेन षोडशाहुतीश्च हुत्वा । प्राचीन कुण्डे सर्पिषा ओं वनदेवताभ्यः स्वाहा, ओं पर्वतेभ्यः स्वाहा, ओं गरुडशैलेभ्यः स्वाहा,

ओं तटेभ्यः स्वाहा, ओं श्रृङ्गेभ्यः स्वाहा, आं निर्झरेभ्यः स्वाहा,
ओं समुद्रेभ्यः स्वाहा, ओं वृक्षेभ्यः स्वाहा, ओं ओषदीभ्यःस्वाहा,
ओं वनस्पतीभ्यः स्वाहा, ओं जरायुजेभ्यः स्वाहा, ओं अण्डजेभ्यः स्वाहा, ओं
स्वेदजेभ्यः स्वाहा, ओं उद्भीजेभ्यः स्वाहा, ओं सर्वेभ्यः भूतेभ्यः स्वाहा, ओं भूर्भुवस्सुवः
स्वाहा इति हुत्वा । संपाताज्यं संगृह्य । पूर्णाहुतिं च हुत्वा । संपाताज्यम् शिलायां
स्पर्शमन्त्रेण विस्राव्य । पलल रजनी चूर्ण लाजापूप करम्भत्वग्भिः गन्धद्रव्याणि
संयोज्य। ओं सर्वेभ्यो भूतेभ्यः नमः इति भूतबलिंदत्वा । स्वप्नाधिपति मन्त्रेण आज्येन
अष्टोत्तर शताहुतीः हुत्वा । अग्निमुद्वास्य । निशि सवेदवाद्यघोषं आचार्यः उपोषितः
अष्टोत्तरशत संख्यया स्वप्नाधिपति मन्त्रं जपित्वा । दर्भशय्यायां स्वापम् कुर्यात् । ततः
स्वप्ने यदि पर्वतं समुज्ज्वलं पश्येत् । प्रातः एव उत्थाप्य । आचार्यः तत्र शिला संग्रहणं
विधिवत् कुर्यात् । स्वप्नादर्शने दुस्वप्न प्रदर्शने वा शांतिं कुर्यात् । तदनु सुमुहूर्ते शिलां
वीक्ष्य अस्त्रमन्त्रेण संसिद्धान् सिद्धार्थान्।
यक्षाः पिशाचाः नागाः च ये अत्र तिष्ठन्ति नित्यशः।
सर्वे ते व्यपगच्छन्तु सन्निधत्तां सदा हरिः।
इति मन्त्रेण तत्र विकीर्य । पुनः अपि ओं लां नमः पराय सर्वात्मने नमः। सर्वभूतेभ्यः
बलिं ददामि इति प्रतिदिशं । बलिंदत्वा । ततः पुण्याहं वाचयित्वा । प्रोक्ष्य । ओं यां
नमः पराय पुरुषात्मने नमः इति शिलां सम्स्पृश्य । मूलमन्त्रेण अर्घ्यं दत्वा ।
अष्टोत्तरशत संख्याकं मूलमन्त्रं जपेत् । प्रासाद प्रतिमानुगुण्येन सूत्रं निपात्य।रथकार
अनुज्ञया स्थपतयः शिलाःच्छिन्द्यः । साशिला पूर्व दक्षिण पश्चिमोत्तर दिक्षु यत्र शिरसा
पतति तद्दिक्क्रमेण जय शान्ति श्री पुष्टिप्रदा स्यात्। यदि कोणेषु तां वर्जयेत्।
अथवा धाम्नो मुखं यस्यां तस्यांऽ यदि, साच ग्राह्या। एव संवीक्ष्य, शिलां उद्धृत्य, वेदिका
कलशतोयैः। ।पुरुषसूक्तेन अभिषिच्य। करकजलेन परिषिच्य। देवीनां अपि बिम्ब

सिद्ध्यर्थं पूर्ववत् पृथक् कुम्भान् अधिवास्य। मध्यकुम्भे त्रैलोक्यमातरं श्रियं। उप कुम्भाष्टके वागीश्वरि, क्रिया, कीर्ति, लक्ष्मि, सृष्टि, प्रह्वी, सत्या, ब्राह्माख्याः अष्टौ शक्तीः वर्धन्यां सुदर्शनं च आवाह्य।पूर्ववत्' 'ओं श्रीं श्रियैस्वाहा''इति मन्त्रेण समिदाज्यचरुभिःहुत्वा। स्त्रीलिङ्गशिलां संगृह्य। कुम्भजलैःश्रीसूक्तेन अभिषिच्य। वर्धनी जलेन 'ओं सहस्त्रार हुं फट् इति परिषिच्य। परिवार देवता कल्पनार्थं एवमेव तत्तन्मन्त्रेण शिलाः ससंगृह्य। शकटादिकं आरोप्य धाम नयेत्। तदनु रथकारानुज्ञया स्थपतयः यथाविधि प्रतिकृतिः कुर्युः।

दारु संग्रहः

अथ दारु संग्रहण विधिः उच्यते।

वृश्चिकादिमिथुनान्तेषुमासेषुअष्टेषु दारुसंग्रहणं कुर्यात्। शिलासंग्रहणं तु सर्वदैव। संग्रहयोग्य वृक्षः तु चंदन अगरु काश्मर्यं हरिचन्दन केसर खदिरकुरवकासन मधुक देवदारु, जाति बिल्व शमीशाक कदम्भ तिलक मेरु फलिनि सुरभि चंपक शिंशुपा क्षीरिका सालबीजक कुरुविन्द तिनिश स्यंदन चूत तमाल सरळार्जुन कुटज कङ्कोळी सप्तपर्ण मधुष्टीलूरण निचुळ पुन्नाग खदिरा राजवृक्षादयःप्रशस्ताः। सारवद्भिः सर्वदोष विवर्जितैः घनोपेतैरेवदारुभिःप्रतिमां कारयेत्।स्वयं शुष्क दग्ध भग्न हत त्वग्वक्रगुणक्षत कोटर पक्षिसेवित शाश्वच्चण्डालाद्यधमसेवित प्रतिलोमज सेवितनिवासभूत चैत्यस्य देवताधिष्टित स्मशानस्थ मार्गस्य देवतालय कूप तटाकसमीपस्थ विकृताद्याः वृक्षाः वर्जनीयाः।

दारु संग्रहस्य अपि शिलासंग्रहवत् पूर्वं ब्राह्मणभोजनाशीर्वादानुग्रह दक्षिणा वितरण मृत्संग्रहणाङ्कुरार्पणादिकं कर्म सकलं कृत्वा। आचार्यः दारुसंग्रहदेशं आसाद्य। तत्र षोडशस्तंभयुता समध्यवेदिकां प्रपां कारयित्वा। मध्यवेदिकायां धान्यराशौ सलक्षणं सकरकं सकलशाष्टकं महाकुम्भं सगन्धोदकं सूत्रवस्त्रादि वेष्टितं निधाय। परमेष्टिमनुना

सरत्नलोहाश्वत्थ पल्लव कूर्चापिधानं विधाय। पूर्ववदस्त्रमन्त्रेणसिद्धार्थान् विकीर्य। पुण्याहं वाचयित्वा, प्रोक्ष्य। चक्रमुद्राप्रदर्श्य। अञ्जलिना प्रणम्य। कुम्भ करककलशेषु च आधारादि पद्मान्तं पीठं परिकल्प्य। तेषु पूर्ववत् देवताः आवाह्यअभ्यर्च्य। परमान्नं निवेद्य। चतुर्दिक्कुण्डेषु अग्निमुपसमिध्य। वासुदेवादिकान् आवाह्य।अभ्यर्च्य। पलाशसमित्पुष्पफलाज्यपल्लवैः मूलेन अष्टोत्तरशताहुतीः,चरुणा नृसूक्तेन षोडशाहुतीः हुत्वा। पूर्ववत् प्राचीनकुण्डे सर्पिषाओं वनदेवताभ्यःस्वाहा, ओं गरुडशैलेभ्यःस्वाहा, ओं शिलादेवताभ्यः स्वाहा, ओं तटदेवताभ्यः स्वाहा, ओं श्रृ'देवताभ्यः स्वाहा, ओं समुद्रेभ्यःस्वाहा, ओं वृक्षेभ्यःस्वाहा, ओं ओषधिभ्यः स्वाहा,ओं वनस्पतीभ्यःस्वाहा, ओं जरायुजेभ्यः स्वाहा, ओं अण्डजेभ्यःस्वाहा, ओं स्वेदजेभ्यः स्वाहा, ओं उद्भीजेभ्यः स्वाहा, ओं सर्वेभ्यो भूतेभ्यः स्वाहा''इति हुत्वा। उत्थाय। वृक्षमूलं प्रक्षाल्य। नवेनवाससा मूलमन्त्रेण आवेष्ट्य। तेनैव(तैरेव)दर्भैःआच्छाद्य। तदनु केशवादि, दामोदरान्तं मत्स्यादि कल्क्यान्तं च प्रणवादि स्वाहान्तैः तत्तन्मन्त्रैः हुत्वा। संपाताज्यं संगृह्य।''ओं भूःस्वाहा,ओं भुवःस्वाहा,ओं सुवःस्वाहा,ओं भूर्भुवस्सुवः स्वाहा''इति च हुत्वा।

ओं सप्तते अग्ने समिधः सप्तजिह्वाः सप्त ऋषयः सप्तहोत्रास्सप्तधामप्रियाणि।सप्तधात्वा यजन्ति सप्तयोनीरावृणस्वाघृतेन स्वाहा इति पूर्णाहुतिं हुत्वा। सम्पातेन स्पर्शमन्त्रेण वृक्षं संस्पृश्य।

कर्मणा पूर्ववृक्षेण स्थावराकारमाश्रिता।

वृक्षोभिः विष्णोःकर्मार्थं सर्वसंपत्करं तव।

स्थावरत्वादितो गच्छ दिव्यरूपमनुत्तमम्।

भुङ्क्ष्व भोगान् विपुलान् वासुदेवप्रसादतः।

हिनस्मिनाहं त्वां वृक्ष किन्तु मुञ्चामि जन्मतः।।

इति पादपं उपस्थाय। रक्षासूत्रेण मूलमन्त्रेणवेष्टयित्वा। पलल रजनीचूर्ण करम्भलाजचरुगव्यैः''ओंसर्वेभ्यःभूतेभ्यःनमः''इति भूतबलिं दत्वा। स्वप्नाधिपति मन्त्रेण पूर्ववत् हुत्वा।अग्निमुद्वास्य।सवेदवाद्य घोषं स्वप्नार्थं'

ओं ह्रीं नमः स्वप्नाधिपतये सुस्वप्नं मम कुरु स्वाहा''इति मन्त्रं अष्टोत्तर शतवारम् जपित्वा। आचार्यः दर्भशय्यायां शायीत। स्वप्ने दारौ प्रज्वलिते प्रातः एव आचार्यःस्नात्वा। दारुसंग्रहणं विधिवत् कुर्यात्। अदर्शने दुस्वप्न दर्शने चकृत्वा शान्तिहोमम्। ततः गुरुः सुमुहूर्तेवृक्षंपश्यन् यक्षाः पिशाचाः इति गाथां उदीर्य।अस्त्रमन्त्रेण सिद्धार्थान् विकीर्य। भूतेभ्यः बलिंदत्वा। पुण्याहं वाचयित्वा। प्रोक्ष्य। पुरुषमन्त्रेण वृक्षं संस्पृश्य। मूलमन्त्रेण अर्घ्यं प्रदाय। तमेव मनुं अष्टोत्तरशतवारं जप्त्वा।प्राङ्मुखः गुरुः कुठारेण स्वयं वृक्षं छिन्द्यात्। ततः गुर्वनुज्ञया रथकाराः छेदनं कुर्युः। यदिप्राच्या मुदीच्यां वा पतितः तदा अभ्युदयावहः। ततः गुरुः छिन्नं वृक्षं हरिस्वरूपं ध्यायन् मूलमन्त्रेण वेदिकासंस्थित कुम्भतोयेन अभिषिच्य। वर्धनीवारिणा परिषिच्य। आलयं नीत्वा। तेन बालबिम्बादि प्रतिकृतौ कारयेत्।तदनु यजमानः गुरवे पञ्चा'भूषणं निष्कशतं च तदर्धं ऋत्विजां च दक्षिणां दद्यात्।

असंस्कृतेन तरुणायथोक्तविधिना यदि।
कुर्यात् मोहात् प्रतिकृतिं तदनर्थाय कल्पते।
यथोक्त विधिना ब्रह्मन् कुर्यादभ्युदयावहम्।

इति शिलादारु संग्रह विधिः नाम सप्तमः परिच्छेदः

****

अथ अष्टमः परिच्छेदः

प्रतिष्ठाविधिः

प्रतिष्ठाविधिः उच्यते

नूतन प्रतिष्ठा कर्म सिद्ध्यर्थं तत्कर्मारम्भ दिनात् अर्वाक् द्वादशाहे नवाहे सप्तमाहे पञ्चमे अथ तृतीये अहनि वा पालिका घटिकाशरावेषु यथोक्त विधिना अङ्कुरान् अर्पयेत्

पालिकादि लक्षण तेषां लक्षणानि क्रमेण वक्ष्यन्ते।

पालिकाः तावत् साङ्गुलहस्तोत्सेदाः। षोडशाङ्गुल विस्तारमुखाः सप्ताङ्गुल बिलयुताःअष्टाङ्गुल पाद पीठ विस्ताराः धुत्तूरकुसुमसमाः अम्भोजसदृक्षमुखाः। घटिकास्तु द्वाविंशत्यङ्गुलोत्सेधयुताः पञ्चवदनाः मध्ये घटिकाकाराः चतुर्दिक्षु चतुरङ्गुल विस्तीर्णवदन चतुष्टया मध्यभागविलसत्षडङ्गुल विस्तीर्ण वदनयुताःच ।

शरावास्तुविंशत्यङ्गुलोत्सेधाःद्वादशाङ्गुलविस्ताराश्च। यथाविभवविस्तरं हेमादि लोहजाः मृण्मयाः वा शरावघटपालिकाः संपादनीयाः। मुख्यक्कृप्तौ तेषां प्रत्येकशः षड्विंशत्यदि तदा अष्टोत्तरशतंभवति। जगन्यक्कृप्तौ पृथक् षोडश यदि तदा अष्टाचत्वारिंशत् भवति । यद्वा द्वादश द्वादश अष्टौ अष्टौ चत्वारि चत्वारि वा ग्राह्याः। यद्वा सर्वार्थेऽपि पालिकाः एव षोडशाष्टौ चतस्रः वा ग्राह्याः। ते च दैवे कार्यें सर्वेनापि प्रकारेण युग्माः एव भवेयुः। मानुषे तु अयुग्माः।

मृत्सङ्ग्रहण विधिः

तदनु अङ्कुरावापनार्थं शुभे विविक्ते अभिमतेदेशे षोडशस्तंभयुतं चतुर्दिक्कतुद्वारं मण्डपं कल्पयित्वा। तं गोमयेण अनुलिप्या। वन्दन मालिकादर्भमालिका मुक्तादामक्षौमवितान दीपमालाक्षत सुदाचूर्णाद्यैः अलङ्कृत्य। ततः मृत्स‘्रहणार्थं आचार्यः स्नात्वा। अलङ्कृतः धृतोद्यपुण्ड्रः प्रक्षालितपाणिपादः त्रिःआचम्य। खनित्रमानीय अद्भिः प्रक्षाल्य। नवेन वाससा आच्छाद्या पुष्पैः अलङ्कृत्य स्नातं अलङ्कृतं ऋत्विजमाहूय। तन्मूर्ध्नि निक्षिप्य तं गजस्कन्धं रथमश्वं वा आरोप्य। सध्वजच्छत्रपताकावाद्यवेद घोषं शाकुन सूक्तपाठकैः साङ्कुरपालिका बहु दीपैः भक्तैः भागवतैः साकं प्राचीमुदीचीं वा दूरात् मनोहरां दिशं गत्वा।तत्र प्रपां कल्पयित्वा अलङ्कृत्या। तत्र आसने प्राङ्मुखः

उपविश्य। प्रतिष्ठाकर्म सिद्ध्यर्थं मृत्सङ्ग्रहण कर्म करिष्ये इति स'ल्प्य। प्राणानायम्य। आत्मशुद्धिं मानसयागान्तं कृत्वा। गलन्तिकायां

ओं नमो भगवते सुदर्शनाय चक्रराजाय ज्वालामालिनेहुंफट् स्वाहा आगच्छ आगच्छ इति आवाह्य अभ्यर्च्य पुण्याहं वाचयित्वा,

तज्जलेन सहस्त्रारहुंफट् इति धरणीं विष्णु गाय त्यां प्रक्षालितं खनित्रं च संप्रोक्ष्य। तत्र ऊद्य वक्रां ऐशाने न्यस्त मौलिकां नैऋते न्यस्त पादां भुवं नव ताल मानेन आलिख्य। दर्भैः परिस्तीर्य।

ओं भूमिः भूम्ने इति सूक्तेन भुवं कूर्चेन स्पृशन् वराहं ध्यात्वा । अभिमन्त्र्य तत्र ओं भूं भूम्यै नमः आगच्छ आगच्छ इति आवाह्या, ओं भां ज्ञानाय हृदयाय नमः इति षडङ्ग न्यासं कृत्वा कलार(कल्हार) मुद्रां प्रदर्श्य। भूमन्त्रेणैव अघ्यादिभिः अभ्यर्च्य। खनित्रं दर्भैः परिस्तीर्य। तस्मिन् ओं नमो भगवते हुं वराहाय आगच्छ आगच्छ इति आवाह्य ओं ह्रां ह्रीं इत्यादि षडङ्गन्यासं कृत्वा । वराह मुद्रां प्रदर्श्य। अर्घ्यादिभिः अभ्यर्च्य। पूर्वादि दिक्षु इन्द्रादीन् आवाह्या अभ्यर्च्य । सर्वेभ्यः निवेद्य । भूम्यां मुख बाहु ऊरुस्थल स्तन जठर मध्यजघनाङ्घ्रिषु सर्वे सवाद्यघोषं वराहमन्त्रेण मृदंखात्वा । लोहजे वेत्रजे वा भाजने मूलमन्त्रेणसंगृह्य। अस्त्रमन्त्रेणअहतवाससा आच्छाद्या । पश्चात् एवमेव नद्याः गोकुलाच्च वालुकां गोकरीषं च संगृह्य । पृथक् पृथक् भाजनयोः निक्षिप्य। वासोभ्यां पिधाय । गुरुः स्वयं भाजनत्रयमपि वहन् गजं वा स्यन्दनं वा आरुह्य। सवेद् वाद्यघोषं ग्रामं प्रदक्षिणी कृत्य। अङ्कुरार्पण मण्डपं प्रविशेत् ।इति श्रीवराहगुरुणा विरचितायांक्रियाकैरव चंद्रिकायां मृत्संग्रहणविधिः नाम अष्टमः परिच्छेदः

****

नवमः परिच्छेदः

अङ्कुरार्पण विधिः

अथ अङ्कुरार्पण विधिः उच्यते ।

आचार्यः स्नातः नूतन क्षौमपरिधान उत्तरीयःउष्णीष गन्धमाल्य पवित्र कुण्डल हार कटकादि भूषा विशेषालङ्कृतः मूर्तिपैरपि एवं विधैःसाकं आदौआजानुवामणिबंधात् हस्तौच प्रक्षाळ्य। आचम्य। अङ्कुरार्पण मण्डपं पुण्याह जलेनप्रोक्ष्य।

तत्रचन्दनाद्राणिसूत्राणि प्रागायतानि द्वादश उदगायतानि पञ्चदशच पातयित्वा। तत्र चतुःपञ्चाशदुत्तर शतपदेषु ब्रह्मादीशानान्तं द्वादश द्वादश पदानि पालिका घटिका शराव स्थापनार्थं संगृह्य। शेषाणि षड्त्वारिंशत्पदानि संमृज्य।

ब्रह्मेन्द्र वरुणस्तानेषु घटिकाः.आग्नेय यम नैऋत स्थानेषु पालिकाः,मारुत सौम्य रौद्रेषु शरावान् च पृथक् पृथक् एवं अष्टोत्तर शत संख्यया स्थापयेत्।

प्रत्येकं षोडशग्रहणविधाने तु प्रागायतानि नव उदगायतानि द्वादश सूत्राणि निपात्य। तेषु अष्टोत्तर अशीति पदेषु पूर्वादि पश्चिमांतेषु स्थानेषु चत्वारि चत्वारि पदानि एवं षोडश आग्नेयादि नैऋतांतेषु चतुर्षुस्थानेषु चत्वारि चत्वरि एवंच षोडश रौद्रादि वायव्यांतेषु चतुर्षु च चत्वारि चत्वारि एवमपि षोडश एवं अष्टचत्वारिंशत पदानि पात्रस्थापनार्थंसंगृह्य। शेषाणि चत्वारिंशत्पदानि संमृज्य । पूर्वोक्त विधिना पात्राणि स्थापयेत्। त्रिविधपात्राणां प्रत्येकं द्वादश ग्रहण विधौ तु प्रागायतनि नव उदगायतानि च नवसूत्राणि निपात्य । तेषु चतुष्षष्टि पदेषु बाह्यतः द्वे द्वे पङ्क्ती विभज्य। अन्तरान्तरा एकां पङ्क्तिं विसृज्य च ।

ऐशानेन्द्राग्नेय नैऋत वारुण मारुत भागेषु चत्वारि चत्वारि पात्रानि स्थापयेत्। द्वादश पात्रस्थापन विधाने तु प्रागायतानि चत्वारि उदगायतानि पञ्च सूत्राणि विधज्य । द्वादश पदेषु चतस्रः पालिकाः चतस्रःघटिकाः चतस्रः शरावाश्च स्थाप्याः । अथवा परितः सोमकुम्भं षोड्श अष्टौ चतस्रः वा पालिकाः एव स्थाप्यः । एवं कृत्वा पालिकादीनि पात्राणि विष्णुगाय त्यां प्रक्षाल्य।

तेषां कण्ठेषु सहदेवी दूर्वाऽश्वत्थ पल्लवानि बध्वा । कुश काशतृणैः बिलमूलानि अवरुध्य। तानि प्रथमं मृद्भिः,अनन्तरं वालुकाभिः तदनु करीष चूर्णैश्च पूरयित्वा। तेषु कूर्चं निधाय। पालिकादि स्थानेषु प्रतिपदं शालि तण्डुल तिलैः क्रमेण आढक तदध प्रस्थपरिमितैः वृत्तं चतुरश्रं वा

ओं रां नमः पराय विश्वात्मने नमः इति पीठंकृत्वा । तदुपरि पद्ममालिख्य । प्राङ्मुखः उदङ्मुखः वा ओं षौं नमः पराय परमेष्ठ्यात्मने नमः

इतिवारुण्यादि ऐन्द्रान्तं घटिका. ओं यां नमः पराय पुरुषात्मने नमः इति नैऋत्यादि आग्नेयान्तं पालिकाः, ओं रां नमःपराय विश्वात्मने नमः इति वायव्यादि ऐशानान्तं शरावान् अपिसंस्थाप्य।

ततः दर्भैः परिस्तीर्य। सोमकुम्भमुद्धृत्य।

इन्द्रं नत्वावाजिन मां बृहतायां तृषुभाजनो योगानां ब्राह्मणादीनां इति मन्त्रेण तन्तूनावेष्टितानां अन्तरालं यवान्तरं अर्धाङ्गुलान्तरं वा यथाभवेत् । तथा तन्तुना आवेष्ट्य। पालिकादीनां पश्चिमे प्रदेशे धान्यपीठं व्रीहि तण्डुल तिलैः कल्पयित्वा। तत्र पद्मम् विलिख्य। तस्मिन् सोमकुम्भंविन्यस्य। पालिकादीनिप्रत्यग्रैःवासोभिः अशक्तौ प्रतिव्यूहं वा सोमकुंभं च नवाभ्यांवासोभ्यं युवासुवासा इति मन्त्रैः संवेष्ट्य। तं गन्धोदकेन आपूर्य। सरत्नकूर्चापिधानाश्वत्थपल्लवं कृत्वा। दर्भैः परिस्तीर्य।

नीवार शालि मुद्ग माष प्रियङ्गु यव तिल गोधूमादीन् याज्ञिकान् धान्यजातान् नूतने पात्रे निक्षिप्य। तत् परिचारक मूर्धनि निधाय। स तूर्यघोषं धाम प्रदक्षिणीकृत्य। यागमण्डपं प्रविश्य। पालिकादीनां पूर्वभागे द्रोण शाल्यादि धान्य कल्पित पीठे विन्यस्य। तानि बीजानि गोक्षीरैः विष्णु गाय त्र्या प्रक्षळ्य । दर्भैः परिस्तीर्य।

ओं यवाधि दैवताय ब्रह्मणे नमः। ओं सर्षपाधि दैवतायरुद्राय नमः। ओं प्रियङ्वाधि दैवताय सुब्रह्मण्याय नमः। ओं निष्पावाधि दैवताय वायवे नमः। ओं मुद्गाधि

दैवताय विष्णवे नमः। ओं शाल्याधि दैवतायै श्रियै नमः। ओं गोधूमाधि दैवताय यमाय नमः। ओं माषाधि दैवताय यक्षाय नमः। ओं तिलाधि दैवताय जलादिपाय नमः। ओं वेणुधान्याधि दैवताय विनायकाय नमः। इति तत्तद्बीजाधिदैवतानि आवाह्यअभ्यर्च्य। नवेन वाससा आच्छाद्य।

सोमकुम्भे च आधारादि पद्मान्तं पीठं परिकल्प्य। अभ्यर्च्य तस्मिन्, सों सोमाय नमः आगच्छ, आगच्छ इति सोममावाह्य। ओं सा इत्यादि षडङ्गन्यासं कृत्वा।

अर्घ्यादिभिः अभ्यर्च्य।पुनः पुण्याहं वाचयित्वा।प्रोक्ष्य।बहिः शङ्खभेर्यादि वाद्यानि आघोष्य।

घटिकासु ओं कं ब्रह्मणे नमः आगच्छ आगच्छ इति ब्रह्माणं,

पालिकासु ओं अं विष्णवे नमः आगच्छा आगच्छ इति विष्णुं च,

शरावेषु ओं ईशानाय नमः आगच्छा आगच्छेति ईशानं आवाह्य अभ्यर्च्य।

द्वारावरण ध्वजकुम्भ देवता पूजनं करिष्ये,इति संकल्प्य,

पूर्वादि द्वारेषु चतुर्षु धान्यपीठं परिकल्प्य।तत्तत्तोरण ध्वजान् इदं विष्णु इति कुम्भानपि संस्थाप्य।

पूर्वे ऋग्रूपे सुशोभन नाम्नि अश्वत्थ तोरणे ओं लं इन्द्राय नमः तत्पार्श्वस्थित रक्त ध्वजयोः, कुमुदाक्षाय नमः तत्र कुम्भयोः प्रवाळं, पद्मरागं च क्रमेण निक्षिप्य। तयोः ओं पूर्णाय नमः, ओं पुष्कराय नमःइत्यावाह्य, गन्धादिभिः अभ्यर्च्य।

दक्षिणे यजुरूपे सुभद्र नाम्नि औदुंबर तोरणे ओं यमाय नमः, तत्पार्श्वस्थित पीत ध्वजयोः ओं पुण्डरीकाय नमः, ओं वामनाय नमः, तत्र कुम्भयोः क्रमेण वज्र वैडूर्ययोः ओं आनंदाय नमः, ओं नन्दाय नमः, इत्यावाह्य अभ्यर्च्य।

पश्चिमे साम रूपे सुबन्ध नाम्नि न्यग्रोधतोरणे ओं वं वरुणाय नमः, तत्पार्श्वस्थित नीलध्वजयोः ओं शंकु कर्णाय नमः, ओं सर्व नेत्राय नमः, तत्र कुम्भयोः क्रमेण सपुष्यराग नीलयोः''ओं वीरसेनाय नमः, ओं सुषेणाय नमः, इत्यावाह्य अभ्यर्च्य । उत्तरे अथर्वरूपे सुहोत्रनाम्नि प्लक्षतोरणे ओं सं सोमाय नमः, तत्पार्श्वस्थित पाण्डरध्वजयोः ओं सुमुखाय नमः, ओं सुप्रतिष्ठाय नमः, तत्र कुम्भयोः क्रमेण समुक्ता स्फटिकयोः ओं सम्भवाय नमः, ओं प्रभवाय नमः, इत्यावाह्य अभ्यर्च्य। सर्वान् पिधाय। द्वारतोरणकुम्भान् प्रत्येकं नवैः वासोभिः आच्छाद्य।पालिकाधि देवताः सोमकुम्भं च पुनः अपि संपूज्य। पायसान्नं शुद्धान्नम् वा निवेद्य। ततः कुण्ड स्थण्डिलं वा विधिवत् अग्निप्रतिष्ठादि अग्नि मुखान्तं कृत्वा। अग्निमध्ये आधारादि पद्मान्तं पीठं होमेन परिकल्प्य । तस्मिन् पूर्ववत् सोममावाह्य। ध्यात्वा अभ्यर्च्य। अर्घ्यादि नैवेद्यान्तंघृतेन दत्वा । तत्तन्मन्त्रेण सर्पिषा अष्टोत्तरशताहुतिः, पलाश खादिर अश्वत्थबिल्व समिद्भिःमूलमन्त्रेण अष्टोत्तरशताहुतीः, नृसूक्तेन चरुणाषोडशाहुतीश्च, पुनः सर्पिषा सोममन्त्रेण अष्टोत्तर शताहुतीश्च हुत्वा। संपदाज्यं संगृह्य। स्पर्शमन्त्रेण हस्ताभ्यांपालिकादि पात्रेषु अवशिष्टं बीजपात्रे च निक्षिप्य।पूर्णाहुतिं कृत्वा। अग्निस्थं सोममुद्वास्य । सोममन्त्रं शतवारं जप्त्वा । पुण्याहं वाचयित्वा, प्रोक्ष्य। आचार्यः स्वस्थमनाः सुमुहूर्ते सदस्यैः वैष्णवैः अनुज्ञातः द्वादशाक्षर विद्यया पालिकादि पात्रेषु बीजावापं कृत्वा । मूर्द्धानं दिवो अरतिं' इति मन्त्रेण मृद्भिः आच्छाद्य। इमं मे इति आरभ्य प्रमोषीः इत्यंतेन सोमकुम्भ जलेन संसिच्य। पिधानैःआच्छाद्य। रक्षिभ्यः कुमुदादिभ्यः बलिंदध्यात्। एवं यावत्कर्मावसानं अहर्निशं सोमकुम्भ पूजन परमान्ननिवेदन। दीपारोपण बलिप्रदानानि कुर्वन् हरिद्रा जलेन अङ्कुराभिवृद्ध्यर्थं संसिच्य।सुगुप्ते स्थले संस्थाप्य। रक्षेत्। यजमानःगुरूण् ऋत्विजश्च वित्त तांबूल फलादिभिः तोषयेत्।

इति क्रियाकैरवचन्द्रिकायां अङ्कुरार्पण विधिः नाम नवमः परिच्छेदः।

****

दशमः परिच्छेदः

प्रतिष्ठा उपकरण विधिः

अथ तावत् प्रतिष्ठा उपकरण विधिः उच्यते।

तत्र कुण्ड लक्षणम्-प्रासादस्य अग्रभागे प्रथमद्वितीय तृतीयावरणेषु योग्यावकाशेषु एतेषु अष्टासु आशासु अभिमते देशे दशभिःहस्तैः विस्तीर्णायामयुतम् चतुर्दिक्षु चतुद्वार मण्डपं कल्पयित्वा। तन्मध्ये मानांतराङ्गुल वशेन पञ्चहस्तायामविस्तारां एकहस्तोच्छ्रिताम् चतुरश्रां वेदिमिष्टकया कल्पयित्वा।

तस्याः त्रितलात् बहिः पूर्वदेशे मुष्ट्यङ्गुलवशेन चतुर्विंशत्यङ्गुलायाम विस्तारं चतुरश्रं विंशत्यङ्गुल प्रकृतिमानं भूतलं खात्वा। खातभूतलात् बहिः द्व्यङ्गुलं विसृज्य। ततः तालमानां चतुरङ्गुलविस्तारां सात्विकीं प्रथम मेखलां, तत्परितः अष्टाङ्गुलमानां चतुरङ्गुल विस्तारां राजसीं द्वितीय मेखलां, तत्परितः चतुरङ्गुलमुन्नतां तावत् विस्तारां तामसीं तृतीय मेखलां च इति क्रमेण यथाविधि इष्टकयैव कुण्डानुगुण्येन मेखलात्रयं कुर्यात्।

वेदिकायाः च आग्नेये पूर्ववत् चतुर्विंशत्यङ्गुलायाम विस्तारं सूत्रं चतुरश्रं निपात्य। पश्चिमभागागमे नैऋतवायव्य कोणाभ्यां पञ्च पञ्च अङ्गुलीः हित्वा। ततः प्रतीच्यागमे शङ्कुमारभ्य दक्षिणोत्तर सूत्रभ्रमणं कृत्वा। ततः पूर्वागम शङ्कुपर्यन्तं दक्षिणोत्तर सूत्रे निपात्य। योन्याकारं कृत्वा। शेषं संमार्ज्य। विंशत्यङ्कुल प्रकृत्युच्छ्रायं खात्वा। तस्मात् द्वयङ्गुलं विसृज्य।पूर्ववत् कुण्डानुगुण्येन मेखलात्रयं कुर्यात्। बहिः शङ्कुं संस्थाप्य।

अष्टादशाङ्गुल सूत्रं शङ्कोः पूर्वतःपश्चिमतः च तथा निपात्य।अष्टादशाङ्गुलं सूत्रं पूर्वमारभ्य पश्चिमान्तं भ्रामयेत्। तदा चापाकारंभवति।

प्रकृतिं तथैव विंशत्यङ्गुलं खात्वा।तस्मात् द्व्यङ्गुलं विसृज्य।

पूर्ववत् कुण्डानुगुण्येन मेखलात्रयं कुर्यात्। तस्याः नैऋते शङ्कुंसंस्थाप्य। भुवन संख्याङ्गुल वशेन सूत्रं परिभ्राम्य। वृत्तं कृत्वा। वृत्तं चतुर्विंशत्यङ्गुल वशेन षोढा विभज्य। शङ्कुं निधाय। पूर्व पश्चिम शङ्कुभ्यां सूत्रं निपातयेत्। एवमेव सूत्रनिपाते कृते,अष्टाङ्गुल निरन्तरं षडश्र कुण्डं भवति।तथा विंशत्यङ्गुलं प्रकृतिं खात्वा। खातभूतलात् द्व्यङ्गुलं हित्वा। कुण्ड वशेन मेखलात्रयं कुर्यात्। तस्मात् पश्चिमे तालत्रयात् बहिः शङ्कुंसंस्थाप्य। पक्षाङ्गुल वशेन सूत्रवर्त्मना चक्रवत् वृत्तं कृत्वा। पूर्ववत् प्रकृतिं कुण्डानुगुण्येन मेखलात्रयं च कुर्यात्।

अस्य मेखलास्थाने द्वादश अष्टौ वा दलानि कल्पितानि चेत् पद्म कुण्डं भवति। मेखलास्थाने अराणि कल्पितानि चेत् चक्रकुण्डं भवति। तस्याः च मारुते शङ्कुंसंस्थाप्य। सार्धगोलकाचलाङ्गुल सूत्रपातेन वृत्तं कृत्वा। सूत्रागमं पञ्चधा विभज्य।शङ्कुं निधाय। पञ्चकोण वशेन सूत्राणि निपात्य।

कुण्डानुगुण्येन प्रकृतिं मेखलात्रयं च कुर्यात्। तस्याः च उत्तरे तालत्रयात् बहिःषण्णवत्यङ्गुलमानं वेदनाग वशेनविभज्य। तन्मानं त्रिकोणं यथासूत्रं निपात्य। तथा विंशत्यङ्गुलंखात्वा। कुण्डानुगुण्येन पूर्ववत् मेखलात्रयं कुर्यात्। तस्याश्च ऐशाने शङ्कुं निधाय। सैकाग्नि वेदाङ्गुलवशेन सूत्रवर्त्मना वृत्तं कृत्वा। सूत्राङ्गुलं कलशाङ्गुल वशेन अष्टधा विभज्य। शङ्कुं निधाय।कोणमध्यं यथा षडङ्गुलं भवति तथा अष्ट सूत्रं निपात्य। पूर्ववत् कुण्डानुगुण्येन मेखलात्रयं च कुर्यात्। कुण्डानां मध्ये अष्टदलपद्मं कुण्डानां पश्चिमायां तलोत्सेध मेखलोपरि पक्षाङ्गुलायामं अङ्गुलैः दशभिः षड्भिःद्व्यङ्गुलेन एकेन अङ्गुलेन वा मूलमारभ्य। क्रमेण विस्तीर्णां निम्नां मेखलाग्रे चतुरङ्गुलायत त्र्यङ्गुलनहन

षडङ्गुल मुखयुतां नालवत्तया काहलाकारवत् अश्वत्थ पत्ररूपेण योनिं कुर्यात्। पद्म कुण्डे पद्मं,योनिकुण्डे योनिं च वर्जयेत्। होता चेत् उदङ्मुखःयमस्य दिशि वा योनिं कल्पयेत्। मोक्षार्थी चेत् योनिं विना कुण्डं कुर्यात्।

यावत् प्रमाणा रज्जुः स्यात् तावानेव आगमो भवेत्।

आगमार्धं तु शङ्कुः स्यात् अन्तरर्थं निरञ्जनम्।

षण्णवत्यङ्गुलायामा सर्व कुण्डस्य कर्णिका।

इति वचन लक्षणानि सम्यक् ज्ञेयानि। एकमूर्ति विधाने अयुग्मानि एव, अथवा युग्मानि कुण्डानि कारयेत्। मध्यवेदिकायाः पूर्वे दक्षिणे वा भागे सलक्षणं शयनाधिवासार्थं पूर्ववत् वेदिकां कारयेत्।

अथ तावत् स्रुक्स्रुव विधिः उच्यते

सुवर्णादिलोहैः वा पालाशादि यज्ञवृक्षैः वा स्रुक् स्रुवौ कार येत्। स्रुक्दण्डं तु बाहुदण्ड समायतं सांगुलद्वितालायतं वा सर्वतः षडङ्गुल विस्तारं कृत्वा। तं गुणसंख्यया विभज्य। उपर्यंशं द्वेधाविभज्य। तयोः उपर्यंशं च भूतांशं कृत्वा। तत्र आद्यमंशं हित्वा। उपरिस्थितवेदांशौः वराहवदनवत् अग्रं एकांगुलानाहं विधाय। अधोविसृष्टैकांशेन सह स्वतृतीयांशावशिष्टार्ध भागेन संयोजिते, तदा विस्तारायाम समं चतुरश्रं षडंगुलमितं भवति। एवं गलं कल्पयित्वा। तदधः नालं द्व्यंगुलविस्तारं, तत्रपार्श्वयोःअर्धांगुलायाम विस्तार निम्नयुतं कृत्वा। अन्यत् सूत्रपातात् बहिः स्थितं शेषेण हित्वा।

गलाधोवशिष्टांशं वृत्तं चतुरश्रंवा कल्पयित्वा। गलमध्ये तृतीयभाग संमितं विस्तारायामसमं गाध सदृशं गर्तं वृत्तं वा कृत्य।गर्त बाह्यं त्रेधा विधाय। प्रथमवलये दलाष्टकं कृत्वा। मध्यांशं चतुर्धा विभज्य। आद्यं नाभिमण्डलं तस्य बहिः नेमिमण्डलस्य मध्ये, मण्डलद्वयं च एकी कृत्य। तस्मिन् षट् वा दश वा इन्दीवरदलवत् अराणि कल्पयित्वा। अवशिष्टेन एकभागेन नेमि मण्डलं

निर्माय।तत्कोणेषु चतुर्षु शंख़ान् कृत्वा। बहिः मेखलां यवोन्नतां कृत्वा। चतुर्यवप्रमाणेन गर्तं आरभ्य।अग्रान्तं सर्पिषः विवरं कृत्वा। तत्पृष्ठ भागं कमठपृष्ठसदृशं कूर्मपृष्ठसदृशंवा चतुरश्रं विधाय। आधारंविना अन्त्यं वलयत्रयाङ्कितं वृत्तं चतुरश्रं अष्टाश्रं वा कृत्वा।तदग्रं च यथापुरं कमलाकारं कल्पयेत्।

स्रुवस्य तु दण्डं हस्तमानं कृत्वा। तदग्रं द्यंगुल विस्तारं तन्मध्ये नासिकापुटवत् अर्धांगुलविस्तारायामं वृत्तं गर्तद्वयमापाद्य। तदधः गर्तद्वयस्य मध्ये रेखिकां यवोन्नतां तयोःपरितश्च अवशिष्टेन एकांगुलेन गलं च विधाय।परिशिष्टेन गोलांगुलाकृतिं कृत्वा। मूलं द्यंगुल विस्तीर्णं कारयेत्।

मण्डपस्य द्वाराणां चतुष्टयेपि प्रागादिक्रमेण अश्वत्थ, उदुम्बर,प्लक्ष,वटवृक्षैः तेषु एकेन वा यथोक्तालाभे चन्दनद्रुमेण वा तोरणानि कुर्यात्। तत्पादान् सप्तभिः पञ्चभिः वा अयुग्मैःहस्तैः आयतान् द्वाविंशांगुलघनान् वृत्तान् चतुरश्रान् वा कृत्वा।

तदुपरि तदर्धेन आयताः तादृशानाहयुताः तथाविधाश्च पट्टिकाः कल्पयित्वा। प्रति पट्टिकं द्वितालमानानि अष्टांगुलानाहयुतानि त्रीणि त्रीणि कीलानि च निधाय। तोरणानां पादेषु पूर्णकुम्भ दक्षिणावर्तशङ्ख चक्र ध्वज पटह कार्मुकनागान् च चित्रयेत्।

अथ अष्ट मङ्गल विधिः

यथाविभवं हेमादि लोहजानि वा याज्ञीय वृक्षजानि वा क्रमेण द्वाविंशाङ्गुल तदर्द्ध द्वयङ्गुलैः आयामविस्तृति घनयुतानि सपीठानि फलकानि कल्पयित्वा।तेषु श्रीवत्स पूर्णकुम्भ भेरी दर्पणमण्डल मत्स्ययुग्म शङ्खचक्राणि, पद्मासनस्थितं गरुडं च,द्वाविंशाङ्गुल मानेन कल्पयित्वा। तेषां पार्श्वयोः मूर्धनि च चामर प्रदीप छत्राणि लाञ्छयेत्। बिंबप्रमाणानुगुण्येन औदुंबरस्नानपीठं नयनोन्मीलनपीठ जलाधिवासनासनादीन् च आचार्य मूर्तिपासन पादुकाः च उपकुम्भ कलश करकमणिक दीपस्तम्भ घृतादि स्नपनद्रव्य चन्दनादि सुगन्ध विविधवस्तु समित् पुष्प कुश विविध

धान्य सुवर्णादिलोह रत्न सवत्सगोप्रभृतीन् अन्यान् च संभारान् पूर्वं संपाद्य। तदनु आचार्यः यथाविधि प्रतिष्ठामारभेत्।

इति क्रियाकैरवचन्द्रिकायां प्रतिष्ठा उपकरण विधिःनाम दशमः परिच्छेदः

****

क्रियाकैरवचन्द्रिकायां एकादश परिच्छेदः

छायाधिवास जलाधिवास विधिः

पूर्वं शिल्पिभिः शास्त्रोक्त वर्त्मना बिम्बे मान-उन्मान प्रमाण-परिमाण-उपमान-लम्बमान-अभिध लक्षणयुते निर्मिते, स्थूलसूक्ष्मेषु प्रतिमाङ्गेषु सुकृतेषु, कर्मार्चा पीठिकायां रत्नादि न्यासं कृत्वा। शिल्पिनैव नयनेच उन्मीलिते,ततः गुरुः यजमानेन सह रथकारं शिल्पिनः च आभरण वस्त्राद्यैः वस्तुभिः तोषयेत्। तेषु च निर्गतेषु सदनमन्तर्बहिः च मार्जनालेपनादिभिः संशोध्य, दर्भपुञ्जैःप्रज्वालितैः पर्यग्निकरणं च कृत्वा। प्राकार गोपुर मण्डपानि च मार्जनालेपनादिभिः संशोध्य। पञ्चगव्यैः पवमानादि सूक्तैः सम्प्रोक्ष्य। गोघृतेन सर्वत बहून् दीपान् उद्दीप्य। कालागरुप्रभृत धूपद्रव्यैः सर्वतः धूपयित्वा। दूर्वाक्षत सुधाचूर्णैः धाम सलंकृत्य। ततः अपराह्ण समये, गुरु बिम्बस्य''मानादिन्यूनातिरेक शान्त्यर्थं शान्ति होमं करिष्ये''इति संकल्प्य।पुण्याहम वाचयित्वा। विधिवत् अग्निं संस्कृत्य। साक्षतैः शमीपल्लवैः'' ओंभूस्वाहा'' ''ओंभुवस्वाहा'' , ''ओं सुवःस्वाहा'',''ओं महःस्वाहा'',''ओं जनःस्वाहा'',''ओं तपःस्वाहा'',''ओं सत्यंस्वाहा'',इति प्रत्येकं शतमाहुतीः चरुणा नृसूक्तेन षोडशाहुतीः च,''ओं षौं नमः परायपरमेष्ठ्यात्मने स्वाहा'',''ओं यां नमः परायपुरुषात्मने स्वाहा'',''ओं रां नमः पराय विश्वात्मने स्वाहा'',''ओं वां नमः परायनिवृत्यात्मने स्वाहा'',''ओं लांनमः परायसर्वात्मने स्वाहा'',इतिप्रतिमासन्निधौ हुत्वा तदनु नमस्तुभ्यं भगवते जात वेदस्वरूपिणे।

नारायणाय हव्यस्य कव्यस्य च यथातथम्।

भोक्रे यष्टव्यदेवानां आत्मने परमात्मने।

सन्निधत्स्व चिरं देव प्रतिमायां हिताय नः।

इति मन्त्रेण,अधोक्षजमग्निस्थं देवं देवं प्राञ्जलिः सन् उपस्थाय। अग्निं प्रणिपत्य । सदर्भेन नवेन वाससा मूलमन्त्रेण प्रतिमामाच्छाद्य।तेनैव उत्तरीयं च वितीर्य। विष्णु गाय र्त्या अघ्र्य पाद्याचमनीय गन्ध पुष्पधूपदीपाद्यैः अभ्यर्च्य।श्री भूम्योस्तु ओं श्रीं श्रियै नमः, ओं ह्रीं भूम्यै नमः इति तत्तन्मन्त्रैः वस्त्राच्छादनादि दीपान्तैः अभ्यर्च्य । ब्रह्मादि परिवाराणां च स्वस्व मन्त्रेण तथा कृत्वा। छायाधिवास सिद्ध्यर्थं रक्षा बन्धन कर्मकरिष्ये, इति सङ्कल्प्य । सुवर्णादि पात्रे, खारिद्रोण तण्दुलवति षष्ट्युत्तरक्रमुक तच्चतुर्गुण नागवाल्लीदल तदर्ध कदल्यादि फलयुते, निष्कप्रमाण स्वर्ण सूत्राणि यद्वा सप्तभिः,पञ्चभिः वा तन्तुभिः कृतानि क्षौममयानि कार्पासमयानि वा सूत्राणि निधाय। अहतेन वाससा आच्छाद्य।

तत् परिचारक मूध्रि विन्यस्य। चामर व्यजनछत्रनृत्तगीत बृहद्दीपैः साकम् धामावरणानि ग्रामं वा प्रदक्षिणी कृत्य। बिम्बस्य पुरतः चतुरश्रं भूमिं गोमयेन अनुलिप्य। तत्र धान्यभारेण पीठं कृत्वा।तदुपरि तत्पात्रं निधाय। पुण्याहं वाचयित्वा। प्रोक्ष्य। सहस्त्रार हुं फट् इति मन्त्रेण सूत्राणि सप्तवारमभि मन्त्र्य। संपूज्य। बिंबं सम्पूज्य। हस्तयोः अङ्गुष्टानामिकाभ्यां तानि गृहीत्वा। त्र्यंबकं यजामहे सुगन्धि पुष्टिवर्धनं। उर्वारुकमिव बन्धनात् मृत्योः मुक्षीय मामृता इति मन्त्रेण चन्दनक्षोदेन(घृष्ट चन्दनेन)अनुलिप्य।

विश्वेत्ताते सवनेषु प्रवाच्या याचकर्थमघवन्निन्द्रसुन्वते पारावतं यत् पुरसंभृतं वश्वपावृणोच्छरभाय ऋषि बन्धवे इति मन्त्रेण मूलमन्त्रेणवा देवस्य दक्षिणे, देव्याः वामे च हस्ते बद्धा। अस्त्रमन्त्रं शतवारंजप्त्वा । यो ब्रह्माब्रह्मण उज्जहार इति घृतसूक्तेन

अभिमन्त्र्य । बृहत्सामक्षत्रभृत् eइति धूपपात्र भस्मना रक्षां कृत्वा। अर्घ्यादिभिः देव देव्यौ च अभ्यर्च्य। महापूपं निवेद्य। आचार्यः स्वस्यदक्षिण हस्ते कौतुकं बद्धा। देवं द्विषड्वाक्षर विद्ययाप्रणम्य। संस्तुत्य। देवस्य पुरतः भूमौ छायाधिवासार्थं धान्यपीठे सुवर्णादि लोहजां मृण्मयीं वा जलद्रोणीं तादृशं कटाहं वा संस्थाप्य। गालितेन गन्धोदकेन आपूर्य। दर्भैः परिस्तीर्य। पुण्याहं वाचयित्वा। प्रोक्ष्य। पूर्ववत् द्वारतोरण कुम्भान् अभ्यर्च्य। जलद्रोण्यादि जलं ''ओं यां नमः पराय पुरुषात्मने नमः'' इति मन्त्रेण संशोध्य।''ओं रां नमः पराय विश्वात्मने नमः'' इतिमन्त्रेण दग्ध्वा।''ओं वां नमः परायनिवृत्यात्मने नमः''इति अयुतचन्द्रसमप्रभं निवृत्ति मन्त्रं ध्यात्वा। तद्विनिसृतैः अमृतैःपूरितां जलद्रोणीं विचिन्त्य। तस्मिन् आधारादि पद्मान्तं योगपीठंसंकल्प्य। अष्टाविंशति दर्भकृत कूर्चै संहारक्रमं स्मरन् मूलमन्त्रेण हरिमावाह्य।अभ्यर्च्य। कूर्चं जलद्रोण्यन्तर्जले,प्राक्छिरस्कं संहारक्रमेण शाययित्वा।''सशराय शार्'ाय नाराचाय हुंफट् सुदर्शनाय स्वाहा''इति मन्त्रेण चक्रमुद्रां प्रदर्श्य। श्री भूम्योः त्रयोविंशति दर्भकृतकूर्चं, रुद्र वेधसोः पञ्चविंशति दर्भकृतं, अन्येषां देवानां द्वाभ्यां कृतं कूर्चं, पूर्ववत् यथाविधि तत्तन्मन्त्रेण सम्हारक्रमेण शाययित्वा। तद्दक्षिणे शालितण्डुलैःपीठं परिकल्प्य।तस्मिन् स्वर्णादि लोहमयं सकरकं महाकुंभं उपकुंभाष्टकं च मृण्मयंचेत् ससूत्रवेष्टनं विन्यस्य। सरत्न वस्त्रकूर्चाश्वत्थ पल्लवपिधानं कृत्वा। दर्भैः परिस्तीर्य। मध्यकुम्भे ब्रह्माणं, करके सुदर्शनं, उपकुम्भाष्टके च इन्द्रादीन् आवाह्य। अभ्यर्च्य। सर्वाणेन नव वाससा प्रतिमां सम्यक् आच्छाद्य।''''रक्षोहण' इतिमन्त्रेण सिद्धार्थान् दिक्षु समन्ततः विकीर्य। तत्रदीपमनिर्वाणमारोप्य। तत्रब्राह्मणेषु वेदेतिहास पुराणादीन् पठत्सु, गुरुः मन्दिरद्वारेषु''ओं सुदर्शनाय नमः''इति अभ्यर्च्य। मूर्तिपैः सह आलयं प्रदक्षिणीकृत्य। बहिः निष्क्रमेत्। यस्य बिम्बस्य साक्षात् जलाधिवासः न युज्यते तस्य छायाधिवासः

विहितः। दारु लोह शिलामयानां तु बिम्बानां साक्षादेव जलाधिवासः। तेष्वपि लोहजस्य बिंबस्य पीठसंयोजनानन्तरं जलाधिवासं कुर्यात्।

ततः गुरुः संकल्प्य। पीठसंयोजनार्थं शालिभारं वृत्ताकारं विधाय। तदुपरि तदर्धं तण्डुलं, तदुपरि तदर्धं तिलं च सान्तरान्तर वस्त्राच्छादनं विन्यस्य। तस्योपरि अष्टपत्र पद्ममालिख्य। तस्मिन् दर्भान् आस्तीर्य। प्रत्यग्र प्राग्र वाससा आच्छाद्य।तस्मिन् सपद्मं केवलं वा पीठं विन्यस्य।दर्भैः परिस्तीर्य।तस्मिन् रत्नानि लोहानि च विष्णुगाय त्र्या निक्षिप्य।विधिवत् अग्निं उपसमिध्य।विष्णु गाय त्र्या आज्येन अष्टोत्तरशतं आहुतीः,चरुणा नृसूक्तेन षोडशाहुतीः च हुत्वा।ततःपुण्याहं वाचयित्वा, प्रोक्ष्य।स्वस्थ मानसः परवासुदेवं ध्यायन्, मूलमन्त्रेण पीठे देवं समारोप्य।''प्रतिष्ठासि'' इति मन्त्रं पठन् स्थापयित्वा।तेनैव नयनोन्मीलनं च कारयित्वा।तं च महता धनेन तोषयित्वा।ततः मानादि लक्षण न्यूनादि दोष शान्ति होमं पूर्ववत् कृत्वा।''नमस्तुभ्यं''इति गादामुदीर्य।

नमस्तुभ्यं भगवते जातवेदस्वरूपिणे।
नारायणाय हव्यस्य कव्यस्य च यथा तथम्।
भोक्रे यष्टव्यदेवानामात्मने परमात्मने।
सन्निधत्स्व चिरं देव प्रतिमायां हिताय नः।
स्वागतं देवदेवेश विश्वरूप नमोस्तुते।
शुद्धोऽपि त्वदधिष्ठाने शुद्धिंकुर्म क्षमस्व ताम्।।''

पुण्याहं वाचयित्वा।बिम्बशुध्यर्थं धान्यपीठे ससूत्रकूर्च पल्लवपिधानं गोघृतापूरितं कुंभं विन्यस्य। तस्मिन् द्विषड्वाक्षरविद्यया देवमवाह्य अभ्यर्च्य। तेन बिम्बं मूलमन्त्रेण संस्नाप्य।ततः बिम्बं हरिद्रामलकादि चूर्णैः उद्वत्र्य। पुरुषसूक्तेन उष्णोदकेन स्नापयित्वा।सदर्भ नववाससा मूलमन्त्रेण प्रतिमां संवेष्ट्य।तेनैव उत्तरीयं च दत्वा।

अर्घ्यादिभिः अभ्यर्च्य।''जलाधिवासार्थं रक्षाबन्धन कर्मकरिष्ये''इति संकल्प्य। पूर्ववत् प्रतिसरबन्धं कृत्वा। देवं ''उत्तिष्ठ ब्रह्मणस्पते''इति मन्त्रेण उत्थाप्य। ''भद्रं कर्णेभिः''''इति रथादिकं यानमारोप्य।बृहद्रथन्तर पुरुषसूक्त नारायणानुवाक शाकुन रक्षोघ्न सूक्तानि पठद्भिः अन्यैः वेदविद्भिः पाण्डरातपत्र सितचामर चीनांशुकछत्र बर्हबर्हिमय ध्वज कल्याणव्यजन बहुविधान नृत्तगीतवाद्या विशेषादि नानाविधोपचारैः च साकं ग्राम धामादिकं प्रदक्षिणी कृत्य,जलाधिवास देशान्तमासाद्य।जलसमीपे प्रपां कल्पयित्वा।तत्र प्रतिमां प्राङ्मुखमुदङ्मुखं वा आसने विनिवेश्य।जल मध्ये बहुस्तंभप्रपां कल्पयित्वा।चतुद्वारयुतां चतुर्वन्दन मालिकावितान ध्वज दर्भमाला मुक्तादाम स्रक्दीप नानाफलांलंकृतां विधाय।

''जलाधिवास कर्म करिष्ये'' इति संकल्प्य। पूर्ववत् पुरुषमन्त्रेण तज्जलं संशोष्य।विश्व मन्त्रेण दग्ध्वा। निवृत्ति मन्त्रेण अमृतकल्पं विचिन्त्य।पुण्याहं वाचयित्वा । प्रोक्ष्य।तस्मिन् चतुरश्रं सास्तरणं सोपधानं नवं महापीठं विन्यस्य। तस्मिन् आधारादि पद्मान्तं योगपीठं संकल्प्य। अभ्यर्च्य।तत्र द्वार तोरणकुंभान् संस्थाप्य। विधिवत् सम्पूज्य।शाकुन सूक्त पाठकैः ब्राह्मणैः मूर्तिपैःच साकं आचार्यः,''उत्तिष्ठ''इति मन्त्रेण बिंबमुद्धृत्य।''भद्रं कर्णेभिः'' इति जल स्थित पीठे निवेश्य। संहारक्रमं स्मरन् बिम्बं उदङ्मुखं प्राक्किरसं तस्मिन् शाययित्वा। पूर्ववत् धान्यपीठे रक्षार्थं कुम्भ करक कलशान् सलक्षणान् संस्थाप्य। तेषु पूर्ववत् ब्रह्म सुदर्शनेन्द्रादीन् आवाह्य। अभ्यर्च्य। तानपि बिम्ब दक्षिणे जले यथाक्रमं निवेश्य।

''ओं सशराय शार्ङ्गाय नाराचाय हुंफट् सुदर्शनाय स्वाहा'' इति मन्त्रेण चक्र मुद्रां ''ओं नमो भगवते रं प्रळय कालानलाय हुंफट्''इति मन्त्रेण अग्नि प्राकार मुद्रां च प्रदर्श्य। पूर्वादि दिक्षु ऋगादीन् चतुरः वेदान् कोणेषु इतिहास पुराणानिच ब्राह्मणेषु पठत्सु अनिर्वाणान् दीपान् आरोप्य।तीरे नानावाद्यानि आघोषयेत्। एवं त्रिरात्रं वा एकरात्रं

यामार्धं वा जले अधिवासयेत्।तदारभ्य बिंबोत्थापनान्तं तस्मिन् जले स्नानपानादिकं कर्म नकिञ्चिदपि कार्यम्। गृहार्चास्थापनेतु सद्य एव कुर्यात्। जलाधिवास नयनोन्मीलन शयनाधिवासानां च न कालः विधीयते। महाप्रतिष्ठायांतु प्रदोषे जलाधि वासं महानिशि शयनं दिवाप्रतिष्ठांच कुर्यात्।

नदीषु दीर्घिकायांवा तटाकेनिर्झरेपिवा।
जलाधिवासनं कुर्यात्प्रसन्ने सलिलं तथा।
अल्पतोये श्मशानांते लवणोदक दूषिते।
कषाये कटुकेचैव तिक्ते फेनश्च दूषिते।
चैत्यवृक्षसमीपे च नीचेरध्यासते तथा।
ऊषरे शैवलयुते वर्णान्तरयुते तथा।
एवमादिषु दुष्टेषु प्रतिमां नाधिवासयेत्।
नद्याद्यभावे बिम्बस्य जलाधिवसनं भवेत्।
जलद्रोण्यां कटाहे वा समुद्धृत्य महज्जलम्।
यथासंभवमन्यस्मिन् मृण्मयादौ तदिष्यते।
सद्यो वा तोयवासंच पुरस्तादधिवासनात्।*

इति क्रियाकैरवचन्द्रिकायां
जलाधिवास, छायाधिवासविधिःनाम एकादश परिच्छेदः
****

द्वादश परिच्छेदः
वास्तुयाग नयनोन्मीलन विधिः
तत्र वास्तुहोमः

एवंप्रतिमां विधिवत् अधिवास्य। प्रभाते कृतकृत्यो गुरुः यजमानेन सह मण्डपं प्रविश्य।तस्मिन् दक्षिणे पार्श्व विस्रस्तां वास्तुनाथं विलिख्य परिस्तीर्य।''वास्तु होमं करिष्ये''इति संकल्प्य।पुण्याहं वाचयित्वा। प्रोक्ष्य। दर्भसप्तकृतं कूर्चंनिक्षिप्य। ''ओं वं वास्तुपुरुषाय नमः आगच्छागच्छ''इति आवाह्य। वास्तुनाथं गन्धादिभिः अभ्यर्च्य। वास्तु नाथस्य शिरसि ''ओं अंशुमालिने नमः''दक्षिणतः बाहु मूले ''ओं झषध्वजायनमः''कूर्परे''ओं कुमारायनमः'' हस्ते''ओं विनायकाय नमः''पादयोः''ओं अश्विनीदेवताभ्यां नमः'' मध्ये''ओं चन्द्रमसे नमः''सव्यतःहस्ते''ओं दुर्गायै नमः''कूर्परे''ओं सप्त मातृभ्यः नमः''बाहुमूले''ओं स्थाणवे नमः''हृदये''ओं विष्णवे नमः''नाभौ''ओं ब्रह्मणे नमः''तत्परितश्च अष्टसुदिक्षु क्रमेण''ओं लं इन्द्राय नमः''''ओं रं अग्नये नमः''''ओं हं यमाय नमः''''ओं षं नैऋतये नमः''''ओं वं वरुणाय नमः'' ''ओं यं वायवे नमः''''ओं सं सोमाय नमः''''ओं शं शंकराय नमः''वास्तुनाथस्य उत्तरे 'ओं क्षं क्षेत्रपालायनमः''इत्यावाह्य अभ्यर्च्य। वास्तुनाथस्य पश्चिमे देशे विधिवत् अग्निं उपसमिध्य।तस्मिन् तं आवाह्य।पञ्चोपनिषन्मन्त्रैः सर्पिषा सहस्रं शतं वा आहुतीनां हुत्वा।ततः''ओं वास्तुनाथाय स्वाहा''इति सहस्रं शम्यपामार्ग खादिर समिद्भिः आज्येन प्रत्येकं, चरुणा नृसूक्तेन षोडशाहुतीश्च हुत्वा।तदनु''ओं अंशुमालिने स्वाहा''''ओं झषध्वजायस्वाहा'' ओं कुमारायस्वाहा''''ओं विनायकाय स्वाहा''ओं अश्विनीदेवताभ्यां स्वाहा''''ओं चन्द्रमसे स्वाहा'' ओं दुर्गायैस्वाहा ,ओं सप्तमातृभ्यःस्वाहा ''''ओं स्थाणवे स्वाहा''ओं विष्णवे स्वाहा''''ओं ब्रह्मणे स्वाहा''इति चरुणा आज्येन च,सकृत् सकृत् हुत्वा।'' इन्द्रादिदेवेभ्यः क्षेत्रपालाय च नमोन्तैःस्वस्व मन्त्रैः बलिंदत्वा। वास्तुनाथमुद्वासयेत्।

अनर्चिते वास्तुदेवे कृतं कर्म आसुरं भवेत्।

तस्मात् सर्वप्रयत्नेन वास्तुनाथं समर्चयेत्।

नयनोन्मीलनम्-

अथ मण्डपं मार्जनालेपन प्रोक्षणादिभिः संशोध्य। सुधाचूर्णादिभिः तद्भुवमलङ्कृत्य। अस्त्राभिमन्त्रितान् सिद्धार्थान् सर्वतः दिक्षु विकीर्य। ततः नास्तिक भिन्नमर्याद देवब्राह्मणनिन्दक पापरोगयुतानि निन्दित पिशुन पाषण्ड हीनवृत्ति प्रतिलोम समत्सर लुब्ध मूर्खाद्यान् अविदुषः म र्त्यान् च बहिः निर्वास्य। स्तंभवेष्टनवितान मुक्तादामतोरण दर्भमाला फलपुष्पाक्षताद्यैः मण्डपमलङ्कृत्य।तत्र चतुर्दिक्षु तोरणस्थापनार्थं द्वितालमवटं खात्वा। प्राच्यामश्वत्थ तोरणं,याम्ये औदुम्बरं,पश्चिमे न्यग्रोधजम्,उत्तरे प्लाक्षं च तोरणं सम्स्थाप्य।सर्वतः दिक्षु आनद्ध ततसुषिरघनाभिध चतुर्विध वाद्यविशारदैः अन्यैः वेदविद्भिः ब्राह्मणैः च मुखरितं, बहुप्रदीप साङ्कुर पालिका चन्दनागरु कर्पूर धूपालङ्कृतं मण्डपं कारयित्वा। ततः अपराह्णे गुरुः स्वयमुदकात् बिम्बमुत्थाप्य। तीर विष्टरे प्राङ्मुखं विन्यस्य। कुम्भकलशान् च जलात् उद्धृत्य। तत्तद्देवताः उद्वास्य.बिम्बं वारिभिः प्रक्षाल्य। लोहजं चेत् तिन्त्रिणीफल रसेन सम्शोध्य। प्रक्षाल्य। वस्त्राभरण गन्धाद्यैः अलङ्कृत्य। यथापूर्वं बिम्बे यानमारोप्य। सतूर्य म'लघोषं याग मण्डपं प्रापय्य। तत्रोत्तर भागे विष्टरे विनिवेशयेत्। तदनु मूर्तिपैः साकं आचार्यः गर्भगेहं प्रविश्य। पूर्वाधिवासितं कूर्चं कटाहादि जलात् समुद्धृत्यकुम्भदेवताश्च उद्वास्य कूर्चस्थं बिम्बे विचिन्त्य।तस्मात् वस्त्राभरणमाल्यानिव्यपोह्य।

''नयनोन्मीलनं करिष्ये''इति सङ्कल्प्य । पुण्याहं वाचयित्वा। नयनोन्मीलनोपकरणानि प्रोक्ष्य। वक्ष्यमाणेन विधिना ध्रुवबेरस्य, शय्यादीनां च पृथक् नयनोन्मीलनं कृत्वा। अष्ट धान्यानि गाः कन्यकाश्च दर्शयित्वा। साक्षात् स्नपनकरण योग्यविषये वक्ष्यमाण विधिना सप्तदशकलशान् घृतादि द्रव्यपूरितान् संस्थाप्य। तत्तद्देवताः आवाह्यअभ्यर्च्य। सकूर्चे दर्पणे देवमावाह्य।तैः सम्स्नाप्य। शय्यादीनां तु पृथक् नवभिः कलशैः, ब्रह्मेशयोः सप्तभिः,ऋषीणां पञ्चभिः,देवानां त्रिभिः, एकेन वा स्नपनं कृत्वा। दर्पणस्थं बिम्बे

विचिन्त्य। वस्त्रादि नीराजनान्तैः उपचर्य। ध्रुवबेर हृदये दीप्रं मणिप्रभं द्विषडर्णं अनुध्यायन् विन्यस्य। शय्या दीनां च एवं विधाय। ध्रुवबिम्बं शय्यादि देवीश्च कम्बलैःआच्छाद्य। तस्य पुरतः धान्य पीठे सौवर्णं राजतं च पात्रयुग्मं आढकपरिपूर्यं पूर्व पश्चिमं विधाय। क्रमेण मध्वाज्यपूरितं कृत्वा।तादृशौ शलाकिके च अष्टाङ्गुले तयोः विन्यस्य। नवैः वासोभिः आच्छाद्य। सङ्कल्प्य। पुण्याहं वाचयित्वा। तत्सर्वं प्रोक्ष्य। मधुपात्रे''ओं हं सूर्याय नमः''इति, आज्यपात्रे''ओं सं चन्द्रमसे नमः''इति च आवाह्य। अभ्यर्च्य।''मधुवातेति''मधु ''सविराजं पर्येति''इति वा''शुक्रमसीति''वा आज्यं च अभिमन्त्र्य। तत्परितः नीवार शालि मुद्ग श्यामाक प्रियंगु यव तिल गोधूमानि पृथक् पात्रेषु ताम्बूल नारिकेल कदलीफलानि च, पुरतः गाः कन्यकाः,च संस्थाप्य।सवेद वाद्यघोषं मध्वक्तमुखया सौवर्ण शलाकया''चित्रं देवानां''इति दक्षिणं सर्पिरक्तमुखया राजत शलाकया,''तच्चक्षुः''इति वामं च लोचनमुन्मील्य। आच्छादन पटं व्यपोह्य। गुरवे पात्रयुग्मं शलाकिकं अष्टधान्यानि गाःच ''गोविन्दःप्रीयतां''इति दत्वा। पुनः अपि जीवजीवात्मकैः धनैः तोषयेत्।

इति वास्तुयाग नयनोन्मीलन विधिः नाम द्वादश परिच्छेदः

****

क्रियाकैरवचन्द्रिकायां त्रयोदशः परिच्छेदः

कर्माङ्गस्नपन विधिः

अथ तावत् बिम्बशुद्ध्यर्थं''स्नपन कर्मकरिष्ये''इति सङ्कल्प्य। पुण्याहं वाचयित्वा।प्रतिसर कर्मंच पूर्ववत् विधाय। अधमाधम स्नपनोपयुक्त घृतादि कषायांत स्नपनद्रव्याणि पूर्वं संपाद्य। बिम्बस्यपुरतः चतुरश्रं गोमयेण अनुलिप्य. तत्र चंदनाद्राणि सूत्राणि प्रागायतानि उदगग्राणि च षट् निपात्य।तेषु पञ्चविंशति पदेषु मध्ये नवपदानि तत्परितः च अष्ट दिक्षु पदाष्टकं च कुम्भस्थापनार्थं विसृज्य। शेषां संमृज्य। कुम्भाष्टक

सप्तदशकोष्टेषु प्रत्येकमाढकं तदर्धं प्रस्थंवा व्रीहीणां तत्तुर्यांशानि तण्डुलानि तत्तुर्यांशानि तिलानि च उपर्युपरि क्रमेण विन्यस्य। तेषु पद्मानि विलिख्य। द्वे द्वे दर्भाग्रे निक्षिप्य। सौवर्णान् राजतान् ताम्रान् वा यथाविभव विस्तरं मृण्मयान् वा द्रोण परिपूरकान् कुम्भान् विष्णुगाय त्र्यां कुम्भान् प्रक्षाळ्य। मृण्मयान्''इन्द्रन्नत्वेति''तंतुना आवेष्ट्य। कलशस्थापन मेदिन्याः पश्चिमे भागे कलशाधिवासार्थं धान्यपीठं विधाय। तस्योपरि विश्व मन्त्रेण प्रागग्रान् उदग्ग्रान् वा कुशान्आस्तीर्य। तेषुप्राङ्मुखःउदङ्मुखो वा कुम्भान् ओं इत्यधोमुखान् विन्यस्य। तेषु परमेष्टिमन्त्रेण त्रीन् त्रीन् दर्भान् आस्तीर्य।पुरुष मन्त्रेण अघ्र्यजलेन प्रोक्ष्य। विश्वमन्त्रेण अक्षतान् विकीर्य। निवृत्ति मन्त्रेन तान् उत्थानि कृत्व।' 'स्नपनार्थं होष्ये''इति संकल्प्य। विधिवत् अग्निं संसाद्य। तस्मिन् विष्णु गाय त्र्यां आज्येन अष्टोत्तर शताहुतीः हुत्वा। अवशिष्टाज्येनस्नपन द्रव्याणि संसिच्य। कलश स्थापन वेधिका मध्ये कोष्टेषु कुम्भ स्थानेषु मध्यमं कुम्भं घृतेन आपूर्य। विष्णु गायत्र्या विन्यस्य। तत्पूर्व कुम्भं उष्णोदकयुतं तदाग्नेय माणिक्य पद्मराग नीलवज्र पुष्य प्रवाळ मौक्तिक मरकत वैडूर्य रत्नपूरितं कुम्भं। घृतकुम्भस्य याम्ये तथा विध दाडिम चूतामलक बिल्व नारिकेल पनस मातुलङ्ग फलैः भिन्नैर्युतं कुम्भं । घृतस्य नैऋत दिशि सुवर्ण रजत ताम्र सीस त्रपु कम्स्य अयस्सारैः प्रत्येकं निष्कमात्रैः पूरितं कुम्भं घृतस्य पश्चिम दिशि रजनी सूर्यवर्तिनी सहदेवि शिरीषा सदाभद्रा कुशाग्रामिद मार्जन द्रव्यैः पृथक् मुष्टिमात्रैर्युतं कुम्भं. घृतस्य मारुत दिशि चन्दन कुष्ट कुङ्कुमागरु उशीर ह्रीभेर गिरिसंभव मांसी मुराख्य गन्ध द्रव्यैः प्रत्येकं फलमात्रैः युतं कुम्भं। घृतस्य उत्तरे नीवार वेणु शालि प्रियङ्गु यव कङ्गु षाष्टिक गोधूम तण्डुलैः पृथक् मुष्टि मात्रैः द्रव्यैःपूरितं कुम्भं। घृतस्य ऐशान दिशि यव व्रीहिभिः पृथक् कुडुपमानैः युतं कुम्भं च सं स्थाप्य। ब्रह्मस्थान स्थितं कुम्भ नवकस्य प्राच्यां दिशि तुळसी पद्म दूर्वाक्षत श्यामाक विष्णु पर्णी बिल्वपत्रैः मुष्टि मात्रैः चन्दनेन फलमात्रेण च युतं पाद्य कुम्भं, तद्दक्षिणे सिद्धार्थ अक्षत

कुशाग्र फल तिल पुष्पैः पृथक् मुष्टि मात्रैः त्रिनिष्क मात्र चन्दनेन च युतं अघ्यकुम्भं। तत्पश्चिमे तक्कोल चंपक मुकुल कर्पूर जाति फलैर्येलालवङ्ग त्वक्कन्दन पुष्पैः पलार्ध प्रमाणैःयुतं उपस्पर्शन कुम्भं। तदुत्तरे पञ्चगव्यैर्युतं कुम्भं

(पञ्चगव्यानि तु स्नपने

दधि द्विगुणमाघारात् पीयूषं त्रिगुणं ततः।
षड्गुणं मूत्रमेतस्मात् शकृद्वारि चतुर्गुणम्।।

इति प्रमाणेन गव्यानि पञ्च पृथक् मृद्भाजने गृहीत्व। शकृण्मूत्र दधि घृत पयांसि परमेष्टि पुरुष विश्व निवृत्ति सर्वमन्त्रैः यथाक्रमं यथा सर्वमपि द्रोण मानं तदर्धं आढकं वा भवेत्। तथा आनीय कुम्भे सर्वं एकीकृतं) संस्थाप्य। मध्य नवकस्याग्नेये दधि कुंभं, नैऋते क्षीरकुम्भं, वायव्ये मधुकुम्भं, ऐशाने शमी पलाश खादिर बिल्वाश्वत्थ वितत न्यग्रोध त्वग्भिः पलाद्रूध परिमाणाभिः पूरितं, कषायकुम्भं च संस्थाप्य। सप्तविंशति दर्भकृत कूर्चं घृत कुंभे सप्तभिः पञ्चभिः त्रिभिर्वा दर्भैः कृतान् कूर्चान् उपकुम्भेषु अवाग्रं यथाकण्ठमानं विन्यस्य।''ओ नमश्चक्र राजाय''इति शरावैः पिधाय।''युवासुवासा'' इति मन्त्रेण अहत वस्त्रैः तेषां कण्ठवेष्टनं कृत्वा।दर्भैःपरिस्तीर्य। तेषु घृतोष्णोदक फल मार्जनाक्षत रत्न लोह गन्ध पाद्यार्घ्याचमनकषाय कुंभेषु परवासुदेव पुरुष सत्य अच्युत अनंत केशव नारायण माधव गोविंद विष्णु मधुसूदन त्रिविक्रम वामन श्रीधर हृषीकेश पद्मनाभ दामोदरान् स्वस्व मन्त्रेणावाह्य। संपूज्य। पूर्व संपादिताग्नौ मूलेन कलश संख्यया आज्याहुतीः चरुणा नृसूक्तेन षोडशाहुतीः पुनराज्येन कलशदेवता मन्त्रैः पृथक् सहस्रं शतमष्टाविंशतिरष्टौवा आहुतीर्हुत्वा। संपादाज्यं स्पर्श मन्त्रेन कुम्भेषु संसिच्य। अग्निस्तमुद्वास्य। आचार्यः मूर्तिपैः वेदपारगैः ब्राह्मणैश्च बिम्बस्य अन्तिकं

गत्वा 'उत्तिष्ठ ब्रह्मणस्पते '''' इति मन्त्रेण बिम्बं उत्थाप्या। 'भद्रं कर्णेभिः'''' इति स्नानासन वेदिकायां प्राङ्मुखं विनिवेश्य। तदनु पुण्यक्षेत्र नदीतीर पर्वत पुलिन ह्रद निर्झर संग्रम शोष्य वेदिकोर्वर शालिक्षेत्र वेदखात वृषश्रृङ्ग हस्तिदन्त वराहघृष्ट वल्मीक कुलिरावसत नलिनि दीर्घिका सुस्थिताः एकोनविंशति मृत्तिकाः पृथक् पात्रे समानीय पुण्याहं वाचयित्वा प्रोक्ष्य। बिम्बं अर्घ्यादि उपचारैःउपचर्य । पुण्यक्षेत्रजैकोनविंशति मृत्तिकाभिः 'मूर्धानंदिवो'''' इति मन्त्रेण बिम्बं मूर्धादि पादान्तं आलिप्य। शुद्धोदकेन 'इमंमेवरुण'''' इति मन्त्रेन प्रक्षाल्या। अनन्तरं बिम्बं अर्घ्यादिभिः उपचर्य।

'इदं विष्णुः'''' इति पाद्य कुम्भेन,

'आपो हिष्ठा ''''इति अघ्य कुम्भेन,

'इमंमेवरुण'''' इति उपस्पर्शनेन,

'पवित्रं ते'''' इति पञ्च गव्येन,

'दधिक्राविण्णो'''' इति दध्ना,

'पयोव्रत'''' साम्ना पयसा,

'मधुवाता'''' इति मधुना,

'यज्ञायज्ञ'''' इति कषायाम्बुना,

'मानस्तोके'''' इति उष्ण तोयेन,

'वषट् ते विष्णोः'''' इति मणिवारिणा,

'याः फलिनीः''''इति फलाम्बुना,

'हिरण्यगर्भ समवर्तत''''इति लोहवारिना,

'शन्नोदेवीः''''इति मार्जनांभसा,

'गन्ध द्वारा''''इति गन्धांभसा,

'त्रातारमिन्द्रं'''' इति अक्षतवारिणा,

'इदं विष्णोः'''' इति यवांभसा,

'घृतस्नात'''' इति घृतनेच

एतैः मन्त्रैः एतैःकलशैःपाद्यपूर्वं घृतान्तं प्रति द्रव्य घटाप्लवं उपस्नान प्लोतवस्त्रोत्तरीयाघ्य पाद्याचमन गन्ध पष्प धूप दीप प्रदान सहितं

अभिषिच्य । अनन्तरं पुरुष सूक्तेन सहस्त्रधारया शुद्धोदकेन अभिषिच्य। वस्त्रादि अलङ्कृत्य।अर्घ्यादिभिः उपचर्य। फलादिकं निवेद्य। तांबूलंच समर्पयेत्।घृतस्य उपस्नानं उष्णोदकेन।

इति क्रियाकैरवचन्द्रिकायां त्रयोदशः परिच्छेदः

****

चतुर्दशः परिच्छेदः

शयनाधिवास –कुम्भस्थापन विधिः

अथतावत् आचार्यः मण्डपमध्ये वेदिकायां चक्राब्ज मण्डलं वर्तयित्वा। तत्पूर्व दक्षिण वामभागे शय्यावेदिं कृत्वा। द्वादशार्णमनुना गन्धोदकेन प्रोक्ष्य। तस्यां प्रागग्रान् उदगग्रान् वा दर्भान् आस्तीर्य। तत्र व्रीहीणां पञ्चभारं तण्डुलानां तदर्धं, तिलानां तदर्धं च अन्तरान्तर प्रत्यग्राच्छादनान्तरितं विस्तीर्य। तिलोपरि पद्मं विलिख्य। तदुपरि पूर्ववत् दर्भान् आस्तीर्य। तस्योपरि क्रमेण वैयाघ्रचर्म मृद्वास्तरण तूलिकारत्नकम्बल क्षौमचित्रवस्त्र शुक्लवसनानि तदुपरि शयनाङ्गानि उपधानानि सपाद गण्डुकानि निधाय। दर्भैःपरिस्तीर्य। तां कस्तूरिकादि गन्धद्रव्याधिवासितां सुगन्धपुष्प मालादि नानालङ्कारशोभितां कृत्वा।

आचार्यः पुरुषसूक्तादि पाठकैः ब्राह्मणैः ऋत्विग्भिः च तूर्यघोषपुरस्सरं बिम्बं ''उत्तिष्ठ'' इति मन्त्रेण तस्मात् उत्थाप्य। बहिः कुण्डं यथा प्रादक्षिण्येन शनैः शय्यावेदिभुवं, तस्यां आधारादि पद्मान्तं पीठं सङ्कल्प्य। अभ्यर्च्य।''यद्वैष्णवं'' इतिमन्त्रं,''विश्वतश्चक्षुः''इति मन्त्रं च उच्चरन् प्राक्शिरो दक्षिणाननं मन्दिराननं दक्षिणाशाशिरस्कं वा बिम्बं शय्यायां शाययित्वा। ''युवासुवासाः'' इतिमन्त्रेण कम्बलैः वस्त्रैः वा सर्वतः प्रतिमां आच्छादयेत्। तदनु द्वार तोरणपूजां करिष्ये इति सङ्कल्प्य।द्वारतोरण ध्वजकुम्भेषु पूर्ववत् यथाविधि तत्तद्दैवतानि आवाह्य अभ्यर्च्य। पूर्वादिदिक्षु ऋगादीन् वेदान् अन्यान् च ब्राह्मणेषु पठत्सु,सर्वत्र तुर्यघोषेषु प्रवर्तितेषु,समाहितमनाः आचार्यः हृदयकमले भगवन्तं ध्यायन् पुण्याहं वाचयित्वा।

चक्राब्जमण्डले साङ्गं सपरिवारं वासुदेवं यथाविधि संपूज्य। शय्यावेदिं त्रिभागी कृत्य। मध्य दक्षिणभागयोः बिंबे अधिवासिते सति उत्तरभागे देवस्य पश्चिमोत्तरे शालि तण्डुल तिलैः पीठं स वस्त्रास्तरणं कृत्वा ।

तदुपरि पद्ममालिख्य । तस्मिन् सवस्त्र कूर्चाश्वत्थ पल्लवरत्नापिधानं द्रोणमान गन्धोदकपूरितं लोहजं मृण्मयं वा महाकुम्भं,तन्निकटे दक्षिणे तादृशं करकं च शायितबिंब स्थापितकुम्भयोः परितः अष्टसु धान्यपीठेषु तादृक्लक्षणयुतं मूर्तिकुम्भाष्टकं च संस्थाप्य परिस्तीर्य।

तेषु शङ्खचक्र गदापद्म ध्वज श्रीवत्स गरुडकमठान् प्रत्येकं निष्कमात्र जांबूनदकृतान् निक्षिप्य। मूर्तिकुम्भानां मध्ये पूर्वोक्त लक्षणयुतानि अष्टौ फलकानि सुवर्णादि लोहजानि याज्ञीयदारुजानि वा संस्थाप्य। परितः साङ्कुराः पालिकाश्च निधाय.'कुम्भपूजां करिष्ये''''इति सङ्कल्प्य। कुम्भजलानां पृथक् शोषणादिकृत्वा। तस्मिन् जले पीठं आधारादि पद्मान्तं सङ्कल्प्य अभ्यर्च्य।एवं अष्टास्वपि कृत्वा। ततः पूर्वादिषुकुम्भेषु विष्ण्वादि दामोदरान्तान् देवान् स्व स्वमन्त्रेणावाह्यऽभ्यर्च्य। तदानीं पायसान्नेन

भगवन्मयान् ब्राह्मणान् द्वादशाधिकान् भोजयित्वा। तेभ्यः अपि गो तिल वस्त्र सुवर्णानि दद्यात्।

इति श्री वराहगुरुणा विरचितायां क्रियाकैरव चन्द्रिकायां
शयनाधिवास कुम्भस्थापनविधिर्नाम चतुर्दशः परिच्छेदः

****

पञ्चदशःपरिच्छेदः

गोदोहन विधिः तत्वन्यास होमः, प्राण प्रतिष्ठा विधिः

अथ तावत् गोदोहन विधिरुच्यते। तत्र गोःआह्वानमन्त्रः। पूषासि उपसृष्टां मे प्रब्रूतात्। संप्रेष्यति। उपसृजामि''। इत्यामन्त्रयते।

''अयक्ष्मावःप्रजया संसृजामि रायस्पोषेण बहुला भवन्तीः''''।

''गां चोपसृष्टां'' ''विहारंचान्तरेण मासंचरिष्ट''उपसीदामि, ''अयक्ष्मावह प्रजयासंसृजामि रायस्पोषेण बहुळा भवन्तीः ऊर्जंपयः पिन्वमाना घृतंच जीवो जीवन्तीः उपवः सदेयं''

''द्यौश्चेमं यज्ञं पृथ्वी च सन्दुहातां धातासोमेन सहवातेन वायुः यजमानाय द्रविणं दधातु''

''उत्सन्दुहन्ति कलशं चतुर्बिलं इडांदेवीं मधुमतीं सुवर्विदं तदिन्द्राग्नीं जिन्वतँ सूनृतावत् तद्यजमानं अमृतत्वे दधातु, एताभ्यां दोहनम्।

''ओं नमोभगवते वासुदेवाय गङ्गां, यस्यां देवानां मनुष्याणां पयोहितं,सा विश्वायुः,

''देवस्यत्वा सवितापुनातु वसोःपवित्रेण शतधारेण सूपुव,

'हुतः स्तोकोर्हतोद्रप्सोग्नये बृहते नाकायस्वाहा''अग्नये बृहते नाकाय इदं नमम, द्यावापृथिवीभ्याँ स्वाहा।पृथिवीभ्यां इदं नमम''।

एवंद्वितीयां सरस्वतीं इति, तृतीयां गोदां इति चतुर्थीं यमुनां इति दोहयित्वा।

वत्सेभ्यः मनुष्येभ्यःपुनः दोहाय कल्पताम्वाचंविसृज्य अन्वारभ्य तूष्णिं उत्तराः चतस्रः दोहयित्वा।

''संपृच्यध्वमृतावरी रूर्मिणीर्मधु मत्तमा मन्द्राधनस्य सातये''

कुम्भाभ्यां संक्षाळनं आनीय अविष्यन्दयन् सुश्रितानि करोति।

''दृगँ ह गा दृगँ हगोपतिं मा वो यज्ञपतिरिषत्ङ्क''''वर्त्मकुर्वन् प्राक् उद्वासयति।

सायं दोहं दोहयति।सायं दोहवत् प्रातः-दोहंदोहयति। प्रातर्दोहपयः

गृहीत्वा.''सोमेनत्वातनच्मि''''आपो हविषि जागृत यथा देवेषु जागृथ एवं अस्मिन् यज्ञे यजमानाय जागृत।

अयस्पात्रे, दारुपात्रे वा अपः आनीय''अदस्त्वमसि विष्णवेत्वा यज्ञायापि दधाम्यहं अद्भिररिक्तेन पात्रेण याः पूताःपरिशेरते''तेनापि दधाति।''अमृन्मयं देवपात्रं यज्ञस्यायुषि प्रयुज्यतां तिरः पवित्रमतिनीताः आपोधारयमातिगुः''''आचार्यः जपति।

यदि मृण्मयेनापि दध्यात् तृणं काष्ठं वापिधाने अनुप्रविद्धेत्।

''विष्णो हव्यंरक्षस्व'' प्रज्ञातं निदधाति।एवं गोदोहनादि यथाविधि कुर्यात्।।

अथ होमः-

अथ मूर्तिपाः गुर्वाज्ञया वक्ष्यमाण विधिना होमं आरभेत्।

अरणीं अश्वत्थ शमीगर्भाभ्यां संपाद्य।द्वादशाक्षर मन्त्रेण मथित्वा।ततः अग्निं उत्पाद्य।तं वा सूर्यकान्ताश्मनःजातं वालौकिकं वा उपादाय।प्रोक्ष्य।दिव्याग्निं ध्यात्वा।प्रत्यक्कुण्डस्य पश्चिमे दक्षिणेवा त्रीन् दर्भान् संस्तीर्य।तदुपरि कूर्मासनं निवेद्य।तत्र उपविश्य।भूतशुद्ध्यादि मानस यागान्तं कृत्वा।कुण्डान्तः दर्भमुष्टिभिः पर्यग्निकरणं

कृत्वा।एवमेव सर्वेषां कुण्डानां विधाय।प्रत्यक्कुण्डे अग्निसंस्कारं वैष्णवीकरणं च कृत्वा। तस्मादेव इतरेषु अग्निमुद्धरेत्।चतुरश्रादि सर्वकुण्डाग्नि मध्येषु आधारादि पद्मान्तं तत्तन्मन्त्रेण आज्येन हुत्वा,अभ्यर्च्य। चतुरश्र कुण्डाग्नि मध्यस्थ पद्ममध्ये ओं नमोभगवतेवासुदेवाय आगच्छागच्छ,गोक्षीर वर्णं पीतांबरं चतुर्भुजं क्रमेण पद्मचक्र शङ्ख गदाधरं श्रीपुष्टि तुष्टि युतं वासुदेवमावाहयामि। इत्यावाह्य अभ्यर्च्य।

चापकुण्डे ओं नमो भगवते सङ्कर्षणाय आगच्छागच्छ,बालसूर्य निभं पीतांबरं चतुर्भुजं क्रमेण मुसलचक्र शङ्खपद्मधरं श्रीपुष्टियुतं संकर्षणमावाहयामि।इत्यावाह्य अभ्यर्च्य।

वृत्तकुण्डे ओं नमो भगवतेप्रद्युम्नाय आगच्छागच्छ,मरकतवर्णं पीतांबरं चतुर्भुजं क्रमेण कौमोदकीपद्म शङ्ख चक्रधरं (श्रीपुष्टि सहितं) प्रद्युम्न मावाहयामि।इत्यावाह्य अभ्यर्च्य।

त्रिकोणकुण्डेओंनमोभगवतेअनिरुद्धायआगच्छागच्छ,नीलजीमूतनिभं पीतांबरं चतुर्भुजं क्रमेण अभय चक्र शङ्ख गदाधरं (श्रीपुष्टि सहितं) अनिरुद्धमावाहयामि।इत्यावाह्य अभ्यर्च्य।

श्रीवत्सादि गरुडान्तंच तत्तन्मन्त्रेण तेभ्यः सकृत् सकृत् अर्घ्यादि दीपान्तं आज्येन जुहुयात्। इतोऽधिकेषु युग्मेषु अयुग्मेषु वा कुण्डेषु वासुदेवादिकान् यजेत्।

प्रागादिषु कुण्डेषु पालाश खादिर बिल्व उदुम्बर समिद्भिः आग्नेयादि चतुष्वपि पिप्पल प्लक्ष न्यग्रोध काश्मर्य समिद्भिश्च क्रमेण होमः कार्यः।भूयसां परिकल्पने उक्ताभावेऽपि पालाशिभिरेव कार्यः।

चरुश्रपणार्थं-

चतस्रोधेनवस्थाप्याः दक्षिणद्वार्युदङ्मुखः।

गङ्गा सरस्वतींगोदा यमुनारूपधारिणी।

दुग्धैः तदीयैःश्रपणं चरुणामाहुतिस्तथा।

सायन्तन समय एव मन्त्रवदोहनं कृत्वा।

श्रपयेत् पयसापूर्वे शालितण्डुलमाढकम्।

कृसरंदक्षिणात्येऽग्नौ पाश्चात्ये गुडमिश्रितम्.

उदीच्येग्नौ हरिद्रान्नं दुग्धान्नमितराग्निषु।

इति विधाय चतुरश्रमुखेषु कुण्डेषु क्रमेण वासुदेवादिभिः मन्त्रैः समिद्भिः आज्यैः पृथक् अष्टोत्तरशतं आहुतीनां चरुणापुरुषसूक्तेन षोडशाहुतीश्च पुनराज्यैः पूर्वोक्त मन्त्रैः तथा इतरकुण्डेषु च तिलैः सर्वत्र तैः वा आचार्यैः स्वयं हुत्वा। ततः सोत्तरीयवसनाभरणैः मूर्तिपैः यथाविधि होमं कारयेत्। एवं मूर्तिपेषु जुह्वत्सु आचार्यः सर्वालंकारयुतः महाकुम्भस्यपश्चिमे पूर्वाभिमुखमासने सम्यगुपविश्य। महाकुम्भजलस्य शोषणादि कृत्वा। तस्मिन् आधारादि पद्मान्तंपीठं संकल्प्य अभ्यर्च्य। तत्परितश्च यथाविधि ब्रह्मादि नारदान्तं देवान् आवाह्य अभ्यर्च्य। अस्मद्गुरुभ्यो नमः इति गुरून् ध्यात्वा। तस्मिन् परंज्योतिः चैतन्यघनं अक्षरंसर्वगंवासुदेवं ध्यायन्, द्वादशाक्षर विद्यया समावाह्य,ध्यात्वा। प्रणवेन अर्घ्यादि दत्वा। तदनु योगासनाब्ज पत्रेषु श्रीवत्साद्याश्च आवरणत्रयेषु व्याप्त्यादि गरुडान्तान् च आवरणदेवान् अभ्यर्च्य। करकेच पूर्ववत् योगपीठं कृत्वा, तस्मिन् ''सहस्त्रारहुंफट् आगच्छागच्छ सहस्त्रादित्यभास्वरं सहस्त्रारं सहस्त्रज्वालावृतं सुदर्शनं आवाहयामि''इत्यावाह्य,तन्मन्त्रेण अर्घ्यादिभिः अभ्यर्च्य निवेदयेत्।

तत्र आचार्यः बिंब समीपे स्वस्तिकासनं बद्ध्वा उपविश्य। बिंबं पञ्चभूतमयं ध्यात्वा। वक्ष्यमाणेन विधिना तत्व संहारन्यासं कुर्यात्।

ओं ङम् नमः पराय चतुरश्राय पीतवर्णाय घ्राणोपस्थेन्द्रिययुताय शब्दस्पर्शरूप रसगन्धगुणयुताय पृथिवीतत्वात्मने नमः-पादादि जान्वन्तं,

ओं घं नमःपराय स्फटिकवर्णाय अर्धचन्द्राकाराय रसना पाय्विन्द्रिययुताय शब्दस्पर्शरूप रसगुणयुताय अप्तत्वात्मने नमः-जान्वादि गुह्यान्तं,

ओं गं नमःपराय रक्तवर्णाय त्रिकोणाय दृष्टि चरणेन्द्रिययुताय शब्दस्पर्शरूपगुणयुताय अग्नितत्वात्मने नमः-गुह्यादि नाभ्यन्तं,

ओं खं नमःपराय धूम्रवर्णाय वृत्ताय त्वक्करेन्द्रिययुताय शब्दस्पर्शगुणयुताय वायुतत्वात्मने नमः-नाभ्यादि नासिकान्तं,

ओं कं नमःपराय जलदवर्णायनिराकारायवाक् श्रोत्रेन्द्रिययुताय शब्दगुणयुताय आकाशतत्वात्मने नमः-नासादि मूर्धान्तं,

ओं पं नमःपराय सितासित वर्णायमनस्तत्वात्मने नमः-हृदि,

ओं फं नमःपराय पाटलवर्णाय अहंकारात्मने नमः-हृदि,

ओं बं नमःपराय स्फटिकाभासाय बुद्धितत्वात्मने नमः-हृदि,

ओं भं नमःपराय सित वर्णायप्रकृत्यात्मने नमः-हृदि,

ओं मं नमःपराय स्फटिकाभासायजीवतत्वात्मने नमः-हृदि,।

इति बिंबस्य संहारन्यासं कृत्वा।

तदनु चतुरश्रकुण्ड समीपं गत्वा। आसने संयगुपविश्य। तत्वहोमं करिष्ये' इति संकल्प्य। अग्निं ''अदितेनुमन्यस्व'''' ''''इत्यारभ्य ''देवसवितः प्रसुव'''' ''''इत्यन्तेन परिषिच्य। वक्ष्यमाणैः मन्त्रैः हुत्वा।

प्रतिमन्त्राहुति पात्रान्तरम् संपाताज्यं संगृह्य। देवस्यतत्तदङ्गेषु तत्तन्मन्त्रैरेव नमोऽन्तैः कूर्चेन न्यसेत्।

तत्वन्यासः-(सृष्टिक्रमः)

ओं मं नमःपराय स्फटिकाभासाय जीवतत्वात्मने स्वाहा-

ओं भं नमःपराय सित वर्णाय प्रकृत्यात्मनेस्वाहा नमः-

ओं बं नमःपराय स्फटिकाभासाय बुद्धितत्वात्मनेस्वाहा

ओं फं नमःपराय पाटलवर्णाय अहंकारात्मने स्वाहा-

ओं पं नमःपराय सितासित वर्णायमनस्तत्वात्मने स्वाहा-हृदि,

ओं नं नमःपराय शुकवर्णाय शब्दतन्मात्रात्मने स्वाहा-श्रोत्रयोः,

ओं धं नमःपराय लोहितवर्णाय स्पर्शतन्मात्रात्मने स्वाहा-प्रतिमायां त्वचि,

ओं दं नमःपराय ज्योतिर्वर्णाय रूपतन्मात्रात्मने स्वाहा-नेत्रयोः,

ओं थं नमःपराय पाण्डरवर्णाय रस तन्मात्रात्मने स्वाहा-तालुनि,

ओं तं नमःपराय सितवर्णाय गन्धतन्मात्रात्मने स्वाहा-नासिकायां,

ओं णं नमःपराय पाटलवर्णाय श्रोत्रेन्द्रियात्मने स्वाहा-श्रोत्रयोः,

ओं ढं नमःपराय हेमवर्णाय त्वगिन्द्रियात्मने स्वाहा-त्वचि,

ओं डं नमःपराय कृष्णवर्णाय नेत्रेन्द्रियात्मने स्वाहा-नेत्रयोः,

ओं ठं नमःपराय गौरवर्णाय जिह्वेन्द्रियात्मने स्वाहा-जिह्वायां,

ओं टं नमःपराय सितवर्णाय घ्राणेन्द्रियात्मने स्वाहा-नासिकायां,

ओं ञं नमःपराय सितवर्णाय वागिन्द्रियात्मने स्वाहा-वाचि,

ओं झं नमःपराय रक्तवर्णाय पाणीन्द्रियात्मने स्वाहा-करयोः।,

ओं जं नमःपराय रक्तवर्णाय पादेन्द्रियात्मने स्वाहा-पादयोः,

ओं छं नमःपराय रक्तवर्णाय पाय्विन्द्रियात्मने स्वाहा-अपाने,

ओं चं नमःपराय हेमवर्णाय मेहनेन्द्रियात्मने स्वाहा-मेहने,

ओं कं नमःपराय जलदवर्णायनिराकारायवाक् श्रोत्रेन्द्रिययुताय शब्दगुणयुताय आकाशतत्वात्मने स्वाहा।-मूर्धादिनासान्तं,

ओं खं नमःपराय धूम्रवर्णाय वृत्ताय त्वक्करेन्द्रिययुताय शब्दस्पर्शगुणयुताय वायुतत्वात्मने स्वाहा।-नासादि नाभ्यन्तं,

ओं गं नमःपराय रक्तवर्णाय त्रिकोणाय दृष्टि चरणेन्द्रिययुताय शब्दस्पर्शरूपगुणयुताय अग्नितत्वात्मने स्वाहा।-नाभ्यादि गुह्यान्तं,

ओं घं नमःपराय स्फटिकवर्णाय अर्धचन्द्राकाराय रसनापाय्विन्द्रिययुताय शब्दस्पर्शरूप रसगुणयुताय अप्तत्वात्मने स्वाहा।-गुह्यादि जान्वन्तं,

ओं ङम् नमः पराय चतुरश्राय पीतवर्णाय घ्राणोपस्थेन्द्रिययुताय शब्दस्पर्शरूप रसगन्धगुणयुताय पृथिवीतत्वात्मने स्वाहा।-जान्वादि चरणान्तं,

एभिः मन्त्रैः प्रत्येकं अष्टोत्तर शताहुतीः अष्टाविंशतिः अष्टौवा आज्येन हुत्वा।

संपाताज्येन प्रतिमाङ्गेषु न्यसेत्।

अथ प्राणादि दशवायु न्यासः-

ओं नाभिकन्दात् ब्रह्मरन्द्रावधिस्थितायां सुषुम्नायां स्थिताय प्राणाय स्वाहा।

ओं कन्दात् वामनासापुटावधि इडायां स्थिताय अपानायस्वाहा।

ओं कन्दात् दक्षिणनासापुटावधि पिङ्गळायां स्थिताय व्यानाय स्वाहा।

ओं कन्दात् वामदृगन्तं उत्थितायां गान्धार्यांस्थिताय उदानाय स्वाहा।

ओं कन्दात् दक्षिणदृगन्तं उत्थितायां हस्तिजिह्वायां स्थिताय समानाय स्वाहा।

ओं कन्दात् वामश्रोत्रान्तं उत्थितायां पूषायां स्थिताय नागाय स्वाहा।

ओं कन्दात् दक्षिणश्रोत्रान्तं उत्थितायां यशस्विन्यां स्थिताय कूर्माय स्वाहा।

ओं कन्दात् पायुमूलावधि स्थितायां अलंबुसायां स्थिताय कृकराय स्वाहा।

ओं कन्दादारभ्य मेढ्रान्तं अधोगतायां कुहूनायां स्थिताय देवदत्ताय स्वाहा।

ओं कन्दादारभ्य पादाङ्गुष्ठान्तं अधोगतायां कौशिन्यां स्थिताय धनञ्जयाय स्वाहा ।एवं पूर्ववत् होमः न्यासश्च।

अथ प्राणप्रतिष्ठा

अस्य श्री प्राणप्रतिष्ठा महामन्त्रस्य। ब्रह्म विष्णु महेश्वराः ऋषयः।
ऋग्यजुस्सामाथर्वाणि छन्दांसि, सकलजगत्सृष्टि स्थिति संहारकारिणी परा प्राणशक्तिः देवता। आं ह्रीं क्रों बीजं,स्वाहा शक्तिः, ओं कीलकं,बिम्ब प्राणप्रतिष्ठार्थे विनियोगः।

१ आं ह्रीं क्रों यरलवशषह ओं हम्सः,अं ङं घं गं खं कं पृथिव्यप्तेजो वाय्वाकाश प्राणात्मने क्रों ह्रीं आं आं हृदयाय नमः। स्वाहा।

२ आं ह्रीं क्रों यरलवशषसह ओं हम्सः,इं नं धं दं थं तं शब्दस्पर्शरूपरस गन्धापानात्मने क्रोंह्रीं आं ईं शिरसेस्वाहा स्वाहा।

३ आं ह्रीं क्रों य र लवशषसह ओं हम्सः,उं ञं झं जं छं चं वाक्पाणि पाद पायूपस्थव्यानात्मने क्रों ह्रीं आं ऊं शिखायै वषट् स्वाहा।

४ आं ह्रीं क्रों य र लवशषसह ओं हम्सः,एं णं दं डं ठं टं श्रोत्रत्वक्क्षुर्जिह्वा घ्रानोदानात्मने क्रो ह्रीं आं ऐं कवचाय हुं स्वाहा।
५ आं ह्रीं क्रों य र लवशषसह ओं हम्सः,ओं पं फं बं भं मं मनोऽहंकार बुद्धि प्रकृतिजीव समानात्मने क्रों ह्रीं आं औं नेत्राभ्यां वौषट् स्वाहा।

६ आं ह्रीं क्रों य र लवशषह ओं हम्सः,अं यं रं लं वं शं षं सं हं लं क्षं वचना गमनानन्द विहरणोत्सर्गानंद नाग कूर्म कृकरदेवदत्त धनञ्जयात्मने क्रों ह्रीं आं अः अस्त्रायफट् स्वाहा।

ध्यानम्

रक्तांबोधिस्थपोतोल्लसदरुणसरोजाधिरूढाकराब्जैः।

पाशंकोदण्डं इक्षूत्भवं अलिगुणमपि अङ्कुशं पञ्च बाणान्।

बिभ्राणा सृक्कपालं त्रिनयन सहिता पीनवक्षोरुहाढ्या।

देवीबालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः।

मूलमन्त्रम् ओं आं ह्रीं क्रों य र लवशषसह ओं हम्सः,अमुष्यप्राण इहप्राणः आं ह्रीं क्रों य र लवशषसह ओं हम्सः, अमुष्यजीव इहस्थितः, आं ह्रीं क्रों य र लवशषसह ओं हम्सः, अमुष्य सर्वेन्द्रियाणि मनोहंकारबुद्धिप्रधान पृथिव्यप्तेजो वाय्वाकाश श्रोत्रत्वक्क्षु र्जिह्वाघ्राण वाक्पाणिपाद पायूपस्थ त्वक्कर्म मांस रुधिरमेधोस्थि मज्जाशुक्र प्राणाऽपानव्यानोदान समानाः इह आयान्तु सुखं चिरं तिष्ठन्तु स्वाहा ओं इति। पूर्ववत् होमः न्यासश्च । श्रियादिदेवीनां ब्रह्मादिपरिवाराणांच एवमेव कुर्यात्।

अथ आयुधन्यासः-ओं चक्राय स्वाहा, ओं शङ्खय स्वाहा, ओं गदिने स्वाहा, ओं पद्माय स्वाहा, ओं शार्ङ्गाय स्वाहा,। एवं होमः न्यासश्च। अथ भूषणन्यासः-ओं किरीटाय स्वाहा, ओं श्रीवत्साय स्वाहा, ओं कौस्तुभाय स्वाहा, ओं वनमालायै स्वाहा, ओं वैनतेयाय दर्पणरूपाय स्वाहा ।।एवं होमः न्यासश्च।

इति तत्व न्यास होमः नाम पञ्चदशः परिच्छेद:

*******:*******

क्रियाकैरवचन्द्रिकायां षोडशपरिच्छेदः

षोडशन्यास विधिः

अथ प्रणवन्यासः

ओं अं नमः पराय विष्णवे स्वाहाहृदये ।

ओं उं नमः पराय ब्रह्मणे स्वाहादक्षिणोरसि।

ओं मं नमः पराय शंकरात्मने स्वाहा वामोरसि।

ओं नमः पराय त्रिमू र्त्यात्मने वासुदेवाय स्वाहा हृदये। इति होमः न्यासश्च.

अथ व्याहृतिन्यासः

ओं नमः पराय भूलोकाय स्वाहापादयोः।

ओं नमः पराय भुवर्लोकाय स्वाहाहृदि।

ओं नमः परायसुवर्लोकाय स्वाहाशिरसि। इति होमः न्यासश्च.।

अथ अक्षर न्यासः

ओं अं नमः पराय रसनात्मनेस्वाहा जिह्वायाम्।एवमुत्तरत्र।

ओं आं नमः पराय मुखात्मनेस्वाहा।

ओं इं नमः पराय दक्षिणलोचनात्मनेस्वाहा।

ओं ईं नमः पराय वामलोचनात्मने स्वाहा।

ओं उं नमः पराय दक्षिणकर्णात्मने स्वाहा।

ओं ऊं नमः पराय वामकर्णात्मने स्वाहा।

ओं ऋं नमः परायदक्षिणनासापुटात्मने स्वाहा।

ओं ॠंनमः पराय वामनासापुटात्मनेस्वाहा।

ओं ऌं नमः परायदक्षिणगण्डात्मने स्वाहा।

ओं ॡं नमः परायवामगण्डात्मने स्वाहा।

ओं एं नमः पराय उत्तर दन्तपङ्क्त्यात्मने स्वाहा।

ओं ऐं नमः पराय अधो दन्तपङ्क्त्यात्मने स्वाहा।

ओं ओं नमः पराय उत्तरोष्टात्मने स्वाहा।

ओं औं नमः पराय अधरोष्टात्मने स्वाहा।

ओं अं नमः पराय ललाटात्मने स्वाहा।

ओं अःनमः पराय ताल्वात्मने स्वाहा।

ओं यं नमः पराय त्वगात्मने स्वाहा।

ओं रं नमः पराय चक्षुरात्मने स्वाहा।

ओं लं नमः पराय नासिकात्मने स्वाहा।

ओं वं नमः पराय दशनात्मने स्वाहा।

ओं शंनमः परायश्रोत्रात्मने स्वाहा।

ओं षं नमः पराय उदरात्मने स्वाहा।

ओं सं नमः पराय कट्यात्मने स्वाहा।

ओं हं नमः पराय हृदयात्मने स्वाहा।

ओं लं नमः पराय नाभ्यात्मने स्वाहा।

ओं क्षं नमः पराय मेहनात्मनेस्वाहा।

ओं कं नमः पराय अङ्गुष्टाभ्यांस्वाहा।

ओं खं नमः पराय तर्जनीभ्यां स्वाहा।

ओं गंनमः पराय मध्यमाभ्यां स्वाहा।

ओं घं नमः परायअनामिकाभ्यां स्वाहा।

ओं ङं नमः पराय कनिष्टिकाभ्यां स्वाहा।

ओं चं नमः पराय दक्षिणोरुमूलात्मने स्वाहा।

ओं छंनमः पराय दक्षिणोरुमध्यात्मने स्वाहा।

ओं जं नमः परायदक्षिणजान्वात्मने स्वाहा।

ओं झं नमः पराय दक्षिण जङ्घात्मने स्वाहा।

ओं ञं नमः पराय दक्षिणपादात्मने स्वाहा।

ओं टं नमः पराय वामोरुमूलात्मने स्वाहा।

ओं ठं नमः पराय वामोरुमध्यात्मने स्वाहा।

ओं डंनमः पराय वामजान्वात्मने स्वाहा।

ओं ढं नमः पराय वामजान्वात्मने स्वाहा।

ओं णं नमः पराय वामपादात्मने स्वाहा।

ओं तं नमः पराय दक्षिणभुजमूलात्मने स्वाहा।

ओं थं नमः पराय दक्षिणभुज मध्यात्मने स्वाहा।

ओं दं नमः पराय दक्षिणभुज सन्ध्यात्मने स्वाहा।

ओं धंनमः पराय दक्षिणभुज कूर्परात्मने स्वाहा।

ओं नं नमः पराय दक्षिणकरतलात्मने स्वाहा।

ओं पं नमः पराय वामभुजमूलात्मने स्वाहा।

ओं फं नमः पराय वामभुजमध्यात्मने स्वाहा।

ओं बं नमः पराय वामभुज सन्ध्यात्मने स्वाहा।

ओं भंनमः पराय वामभुजकूर्परात्मने स्वाहा।

ओं मं नमः पराय वामकरतलात्मने स्वाहा। इति होमः न्यासश्च।

अथ नक्षत्र न्यासः

ओं नमः पराय रोहिण्यात्मने हृदयाय स्वाहा।

ओं नमः पराय मृगशिरात्मने शिरसे स्वाहा।

ओं नमः पराय आद्रात्मनेकेशाय स्वाहा।

ओं नमः पराय पुनर्वस्वात्मने ललाटायस्वाहा।

ओं नमः परायपुष्यात्मने वदनाय स्वाहा।

ओं नमः पराय आश्लेषात्मने नासिकायै स्वाहा।

ओं नमः पराय मघात्मन्यः दन्तेभ्यःस्वाहा।

ओं नमः पराय पूर्वफल्गुन्यात्मभ्यांश्रोत्राभ्यांस्वाहा।

ओं नमः पराय उत्तरफल्गुन्यात्मने दक्षिणभुजायस्वाहा।

ओं नमः पराय हस्तात्मने वामभुजायस्वाहा।

ओं नमः पराय चित्रात्मने दक्षिणहस्ताय स्वाहा।

ओं नमः पराय स्वात्यात्मने वामहस्ताय स्वाहा।

ओं नमः पराय विशाखात्मनेदक्षिणस्तनाय स्वाहा।

ओं नमः पराय अनुराधात्मने वामस्तनायस्वाहा।

ओं नमः पराय ज्येष्ठात्मने उदराय स्वाहा।

ओं नमः पराय मूलात्मिन्यै कट्यैस्वाहा।

ओं नमः पराय पूर्वाषाढात्मने मेहनायस्वाहा।।

ओं नमः पराय उत्तराषाढात्मनेवृषणाय स्वाहा।

ओं नमः पराय श्रवणात्मने पायवे स्वाहा।

ओं नमः पराय धनिष्टात्मने दक्षिणोरवे स्वाहा।

ओं नमः पराय शतभिषगात्मने वामोरवे स्वाहा।

ओं नमः पराय पूर्वभाद्रात्मिन्यै दक्षिणजङ्घायैस्वाहा।

ओं नमः पराय उत्तरभाद्रात्मिन्यै वामजङ्घायै स्वाहा।

ओं नमः पराय रेवत्यात्मने दक्षिणपादायस्वाहा।

ओं नमः परायअश्विन्यात्मने वामपादाय स्वाहा।

ओं नमः पराय भरण्यात्मने दक्षिणपाश्वायस्वाहा।

ओं नमः पराय कृत्तिकात्मने वामपाश्वाय स्वाहा।इति होमः न्यासश्च।।

अथ ग्रहन्यासः

ओं नमः पराय सूर्यात्मने दक्षिण नेत्राय स्वाहा।

ओं नमः पराय चन्द्रात्मने वामनेत्राय स्वाहा।

ओं नमः पराय अहंकारात्मने उदराय स्वाहा।

ओं नमः पराय बुधात्मिन्यै बुद्धये स्वाहा।

ओं नमः पराय बृहस्पत्यात्मने वागिन्द्रियाय स्वाहा।

ओं नमः पराय शुक्रात्मभ्यःइन्द्रियेभ्यः स्वाहा।

ओं नमः पराय शनैश्चरात्मने ललाटाय स्वाहा।

ओं नमः पराय राह्वात्मने पादाय स्वाहा।

ओं नमः पराय केत्वात्मने केशाय स्वाहा।

ओं नमः पराय ध्रुवात्मिन्यै नाभ्यै स्वाहा।

ओं नमः पराय सप्तष्यात्मभ्यः पादादिसर्वगात्रेभ्यः स्वाहा। इति होमः न्यासश्च।

कालन्यासः

ओं नमः परायशरीरात्मने शरीराय स्वाहा।

ओं नमः परायचैत्रात्मने शिरसे स्वाहा।

ओं नमः परायवैशाखात्मने मुखाय स्वाहा।

ओं नमः परायज्येष्ठात्मने हृदयाय स्वाहा।

ओं नमः पराय आषाडात्मनेदक्षिणस्तनाय स्वाहा।

ओं नमः पराय श्रावणात्मने वामस्तनाय स्वाहा।

ओं नमः पराय भाद्रपदात्मने उदराय स्वाहा

ओं नमः पराय आश्वयुजात्मिन्यै कट्यै स्वाहा।

ओं नमः पराय कार्तिकात्मने दक्षिणोरवे स्वाहा।

ओं नमः पराय मार्गशीर्षात्मने वामोरवे स्वाहा।

ओं नमः पराय पौषात्मिन्यै दक्षिणजङ्घायै स्वाहा।

ओं नमः पराय मखात्मिन्यै वामजङ्घायै स्वाहा।

ओं नमः पराय फाल्गुनात्मभ्यां पादाभ्यां स्वाहा।

ओं नमः पराय वत्सरात्मने वाममुख्यबाहवे स्वाहा।

ओं नमः पराय पर्वात्मभ्यः सर्वपर्वभ्यःस्वाहा।

ओं नमः परायसर्वाङ्गस्वरूपेभ्यः ऋतुभ्यः स्वाहा।

ओं नमः परायषष्ट्युत्तरात्रात्मभ्यःसर्वसन्धिभ्यः स्वाहा।

ओं नमःपराय त्रुटि लव कला काष्ठा क्षण निमेषात्मभ्यः रोमभ्यःस्वाहा।

ओं नमः परायकृतयुगात्मनेमुखाय स्वाहा।

ओं नमः पराय त्रेतायुगात्मने हृदयायस्वाहा।

ओं नमः परायद्वापरयुगात्मिन्यै कट्यैस्वाहा।

ओं नमः परायकलियुगात्मभ्यां पादाभ्यां स्वाहा।

ओं नमः परायस्वायंभुव मन्वन्तरात्मने स्वाहा।

ओं नमः पराय स्वरोचिषमन्वन्तरात्मनेस्वाहा।

ओं नमः परायउत्तममन्वन्तरात्मने स्वाहा।

ओं नमः परायतामसमन्वन्तरात्मने स्वाहा।

ओं नमः परायरैवतमन्वन्तरात्मने स्वाहा।

ओं नमः पराय चाक्षुषमन्वन्तरात्मने स्वाहा।

ओं नमः पराय वैवस्वतमन्वन्तरात्मने स्वाहा।दक्षिणभुजे।

ओं नमः पराय सूर्यमन्वन्तरात्मने स्वाहा।

ओं नमः परायदक्ष मन्वन्तरात्मने स्वाहा।

ओं नमः परायब्रह्ममन्वन्तरात्मने स्वाहा।

ओं नमः परायधर्म मन्वन्तरात्मने स्वाहा।

ओं नमः परायरुद्रमन्वन्तरात्मने स्वाहा।

ओं नमः पराय सावर्णिमन्वन्तरात्मने स्वाहा।

ओं नमः परायरौद्रभूतिमन्वन्तरात्मने स्वाहा।वामभुजे।

ओं नमः पराय प्रथमपरार्धात्मिन्यैदक्षिणजङ्घायै स्वाहा।

ओं नमः पराय द्वितीयपरार्धात्मिन्यै वामजङ्घायै स्वाहा।

ओं नमः पराय महाकल्पात्मने शिरसे स्वाहा।

ओं नमः पराय उत्तरायणात्मने दक्षिण पादाय स्वाहा।

ओं नमः परायदक्षिणायनात्मने वामपादाय स्वाहा। तत्तत्स्थानेषु। इति होमः न्यासश्च।।

अथ ब्राह्मणादि वर्णन्यासः

ओं नमः परायब्राह्मणात्मने मुखाय स्वाहा।

ओं नमः पराय क्षत्रियात्मभ्यां बाहुभ्यांस्वाहा।

ओं नमः परायवैश्यात्मभ्यां ऊरुभ्यां स्वाहा।

ओं नमः परायशूद्रात्मभ्यां पादाभ्यां स्वाहा।

ओं नमः परायसंकरात्मभ्यःपादाङ्गुलीभ्यः स्वाहा।

ओं नमः पराय गवात्मने मुखाय स्वाहा।

ओं नमः पराय अजाविकात्मभ्यां बाहुभ्यां स्वाहा।

ओं नमः पराय अजाविकात्मभ्यां ऊरुभ्यां स्वाहा।

ओं नमः परायग्रामारण्यपश्वात्मभ्यां पादाभ्यां स्वाहा। एवं होमः न्यासश्च।।

अथ तोयन्यासः

ओं नमः पराय मेघात्मभ्यः केशेभ्यः स्वाहा।

ओं नमः परायकूपात्मने रोमकूपाय स्वाहा।

ओं नमः परायवाप्यात्मभ्यां पादाभ्यां स्वाहा।

ओं नमः परायनिर्झरात्मभ्यां जङ्घाभ्यां स्वाहा।

ओं नमः पराय नद्यात्मभ्यः सर्वावयवेभ्यः स्वाहा।

ओं नमः पराय समुद्रात्मिन्यै कुक्ष्यै स्वाहा। इति होमः न्यासश्च।

अथ निगमन्यासः

ओं नमः पराय ऋग्वेदात्मने शिरसे स्वाहा।

ओं नमः पराय यजुर्वेदात्मने दक्षिणभुजायस्वाहा।

ओं नमः पराय सामवेदात्मने वामभुजाय स्वाहा।

ओं नमः पराय सर्वोपनिषदात्मने हृदयाय स्वाहा।

ओं नमः पराय इतिहासात्मिन्यै दक्षिणजङ्घायै स्वाहा।

ओं नमः पराय पुराणात्मिन्यै वामजङ्घायै स्वाहा।

ओं नमः पराय अथर्वाङ्गिरसात्मिन्यै स्वाहा।

ओं नमः पराय कल्पसूत्रात्मभ्यां पादाभ्यां स्वाहा।

ओं नमः पराय व्याकरणीत्मने वक्त्राय स्वाहा।

ओं नमः पराय तर्कशास्त्रात्मने कण्ठाय स्वाहा।

ओं नमः पराय मीमांसानिरुक्तात्मने हृदयाय स्वाहा।

ओं नमः पराय छन्द आत्मने दक्षिण नेत्राय स्वाहा।

ओं नमः पराय ज्योतिषात्मने वामनेत्राय स्वाहा।

ओं नमः पराय शिक्षात्मिन्यै कुक्ष्यै स्वाहा।

ओं नमः परायगारुडतन्त्रात्मने दक्षिणकर्णात्मने स्वाहा।

ओं नमः पराय भूततन्त्रात्मने वामकर्णात्मने स्वाहा।

ओं नमः परायधनुर्वेदात्मने दक्षिणहस्ताय स्वाहा।

ओं नमः पराय आयुर्वेदात्मने वामहस्ताय स्वाहा।

ओं नमः पराययोगशास्त्रात्मने हृदयाय स्वाहा।

ओं नमः परायनीतिशास्त्रात्मभ्यां पादाभ्यां स्वाहा। इति होमः न्यासश्च।

अथ देवता न्यासः

ओं नमः पराय ब्रह्मणे शिरसे स्वाहा।

ओं नमः पराय सरस्वत्यात्मिकायै जिह्वायै स्वाहा।

ओं नमः पराय इन्द्रात्मने दक्षिणभुजाय स्वाहा।

ओं नमः पराय महाबलात्मने वामभुजाय स्वाहा।

ओं नमः पराय विश्वकर्मात्मने दक्षिणस्तनाय स्वाहा।

ओं नमः परायप्रह्लादात्मने वामस्तनाय स्वाहा।

ओं नमः पराय नारदात्मिन्यै दक्षिणकुक्ष्यै स्वाहा।

ओं नमः पराय अनन्ताद्यात्मिन्यै वामकुक्ष्यैस्वाहा।

ओं नमः पराय वरुणात्मभ्यःअस्थिभ्यः स्वाहा।

ओं नमः पराय पित्रात्मभ्यां पादाभ्यां स्वाहा।

ओं नमः पराय विश्वेदेवाभ्यां ऊरुभ्यां स्वाहा।

ओं नमः पराय ऋष्यात्मभ्यां जानुभ्यां स्वाहा।

ओं नमः पराय यक्षात्मभ्यांजङ्घाभ्यां स्वाहा।

ओं नमः पराय राक्षसात्मभ्यां गुल्फाभ्यां स्वाहा।

ओं नमः पराय विद्याधरात्मिन्यै पाष्णये स्वाहा।

ओं नमः पराय नवग्रहात्मने पादतलाय स्वाहा।

ओं नमः पराय पूतनाजृंभकात्मकेभ्यः नखेभ्यः स्वाहा।

ओं नमः पराय सुब्रह्मण्यात्मने दक्षिणकटिपाश्वायस्वाहा।

ओं नमः पराय गन्धर्वात्मने ओष्टाय स्वाहा। इति होमः न्यासश्च।

अथ वैराज न्यासः

ओं नमः पराय स्वर्लोकात्मने मस्तकाय स्वाहा।

ओं नमः पराय सूर्यात्मनेदक्षिणनेत्राय स्वाहा।

ओं नमः पराय चन्द्रात्मने वामनेत्राय स्वाहा।

ओं नमः पराय वाय्वात्मिन्यै नासिकायै स्वाहा।

ओं नमः पराय दिगात्मभ्यां बाहुभ्यां स्वाहा।

ओं नमः पराय ऋष्यात्मने हृदयाय स्वाहा।

ओं नमः पराय व्योमात्मने वपुषे स्वाहा।

ओं नमः पराय देवात्मने अन्तरात्मने स्वाहा।

ओं नमः पराय मेघात्मभ्यःकेशेभ्यःस्वाहा।

ओं नमः पराय नक्षत्रात्मकेभ्यः भूषणेभ्यः स्वाहा।

ओं नमः पराय अग्न्यात्मने मुखाय स्वा हा।

ओं नमः पराय सरस्वत्यात्मिन्यै वाचे स्वाहा। इति होमः न्यासश्च।

अथ क्रतुन्यासः

ओं नमः पराय अश्वमेधात्मने शिरसे स्वाहा।

ओं नमः पराय नरमेधात्मने ललाटाय स्वाहा।

ओं नमः पराय राजसूयात्मने मुखायस्वाहा।

ओं नमः पराय गोसवात्मने कण्ठाय स्वाहा।

ओं नमः पराय एकादशात्मिन्यै नाभ्यैस्वाहा।

ओं नमः पराय अग्निष्टोमात्मने लिङ्गाय स्वाहा।

ओं नमः पराय अतिरात्रात्मने वृषणाय स्वाहा।

ओं नमः पराय आप्तोर्यामात्मभ्यां ऊरुभ्यां स्वाहा।

ओं नमः पराय षोडशाहात्मभ्यां जानुभ्यां स्वाहा।

ओं नमः पराय उक्थ्यस्वरूपायै दक्षिणजंघायै स्वाहा।

ओं नमः पराय वाजपेयस्वरूपायै वामजंघा यै स्वाहा।

ओं नमः पराय चातुर्मास्यात्मने बाहवे स्वाहा।

ओं नमः पराय सौत्रामण्यात्मने हस्ताय स्वाहा।

ओं नमः पराय पश्विष्ट्यात्मभ्यः अङ्गुलीभ्यः स्वाहा।

ओं नमः पराय दर्शात्मने दक्षिणनेत्राय स्वाहा।

ओं नमः पराय पौर्णमासात्मने वामनेत्राय स्वाहा।

ओंनमः पराय इष्टि दर्भ यूप स्वाहाकार वषट्कारात्मभ्यां स्तनाभ्यां स्वाहा।

ओं नमः पराय पञ्चमहायज्ञात्मकेभ्यः अङ्गुलीभ्यः स्वाहा।

ओं नमः पराय दक्षिणात्मने हृदयाय स्वाहा।

ओं नमः पराय स्तोमात्मकेभ्यःकेशेभ्यः स्वाहा।

ओं नमः पराय आहवनीयात्मने मुखाय स्वाहा।

ओं नमः पराय गार्हपत्यात्मने मुखाय स्वाहा।

ओं नमः पराय दक्षिणाग्न्यात्मिन्यै नाभ्यै स्वाहा।

ओं नमः पराय आवसथ्यात्मभ्यां पादाभ्यां स्वाहा।

ओं नमः पराय सभ्यात्मने हृदयायस्वाहा।

ओं नमः पराय प्रवर्ग्यात्मकेभ्यः भूषणेभ्यः स्वाहा। इति होमः न्यासश्च।

अथ गुणन्यासः

ओं नमः पराय सत्वगुणात्मने शिरसे स्वाहा।

ओं नमः पराय रजोगुणात्मने हृदयाय स्वाहा।

ओं नमः पराय तमोगुणात्मभ्यां पादाभ्यां स्वाहा।इति होमः न्यासश्च।

अथ मूर्ति न्यासः

ओं नमः पराय मत्स्यमूर्त्यात्मने शिरसे स्वाहा।

ओं नमः पराय कूर्ममूर्त्यात्मभ्यां पादाभ्यां स्वाहा।

ओं नमः पराय वराहमूर्त्यात्मभ्यां जंघाभ्यां स्वाहा।

ओं नमः पराय नृसिह्म मू र्त्यात्मने ललाटाय स्वाहा।

ओं नमः पराय वामनमूर्त्यात्मने मुखाय स्वाहा।

ओं नमः पराय भार्गवरामात्मनेहृदयाय स्वाहा।

ओं नमः पराय कार्तवीर्यात्मभ्यां कराभ्यां स्वाहा।

ओं नमः पराय दाशरथिरामात्मने हृदयाय स्वाहा।

ओं नमः पराय बलरामात्मने हृदयाय स्वाहा।

ओं नमः पराय कृष्णात्मने हृदयाय स्वाहा।

ओं नमः पराय बुद्धात्मने गुह्याय स्वाहा।

ओं नमः पराय कल्क्यात्मभ्यां जानुभ्यां स्वाहा।इति होमः न्यासश्च।

अथ शक्तिन्यासः

ओं नमःपराय लक्ष्म्यात्मने ललाटाय स्वाहा।

ओं नमः पराय सरस्वत्यात्मने मुखाय स्वाहा।

ओं नमः पराय रत्यात्मने स्वाहा।

ओं नमः पराय प्रीत्यात्मने कर्णाय स्वाहा।

ओं नमः पराय की र्त्यात्मने चक्षुषे स्वाहा।

ओं नमः पराय शान्त्यात्मने हृदयाय स्वाहा।

ओं नमः पराय तुष्ट्यात्मने उदराय स्वाहा।

ओं नमः पराय पुष्ट्यात्मभ्यः सर्वगात्रेभ्यः स्वाहा।इति होमः न्यासश्च।

अथ षड्गुणन्यासः

ओं नमः पराय ज्ञानाय हृदयायनमः स्वाहा।

ओं नमः पराय ऐश्वर्याय शिरसेस्वाहा स्वाहा।

ओं नमः पराय शक्त्यैशिखायै वषट् स्वाहा।

ओं नमः पराय बलाय कवचाय हुं स्वाहा।

ओं नमःपराय तेजसे नेत्राभ्यां वौषट् स्वाहा।

ओं नमः पराय वीर्याय अस्त्रायफट् स्वाहा।इति होमः न्यासश्च।

अथ लोकन्यासः

ओं नमः पराय अतलात्मभ्यां पादतलाभ्यां स्वाहा।

ओं नमः पराय वितलात्मभ्यां पादाभ्यां स्वाहा।

ओं नमः पराय सुतलात्मभ्यां गुल्फाभ्यां स्वाहा।

ओं नमः पराय नितलात्मभ्यां जंघाभ्यां स्वाहा।

ओं नमः पराय महातलात्मभ्यां जानुभ्यां स्वाहा।

ओं नमः पराय रसातलात्मभ्यां ऊरुभ्यां स्वाहा।

ओं नमः पराय तलातलात्मिन्यै कट्यै स्वाहा।

ओं नमः पराय भूलोकात्मभ्यां पादाभ्यां स्वाहा।

ओं नमः पराय भुवर्लोकात्मने मेहनाय स्वाहा।

ओं नमः पराय स्वर्लोकात्मने उदराय स्वाहा।

ओं नमः पराय महर्लोकात्मने हृदयाय स्वाहा।

ओं नमः पराय जनोलोकात्मने कण्ठाय स्वाहा।

ओं नमः पराय तपोलोकात्मने मुखाय स्वाहा।

ओं नमः पराय सत्यलोकात्मने शिरसे स्वाहा। इति होमः न्यासश्च।

जंघमेषु बिंबेषु षोडशन्यासं न कुर्यात्।

इति क्रियाकैरवचन्द्रिकायां षोडशन्यासविधिर्नाम षोडशपरिच्छेदः

****

क्रियाकैरवचन्द्रिकायां सप्तदशपरिच्छेदः

शान्तिहोमः

एवं षोडशन्यासं कृत्वा ततः शान्तिहोमं कुर्यात्।

प्राचीनकुण्डे'ओंभूःस्वाहा''''इति मधुना अष्टोत्तरशताहुतीः हुत्वा।सम्पातेन देवस्य पादौस्पृशेत्। दक्षिणे अग्नौ 'ओं भुवः स्वाहा''''इति पयसा तथा हुत्वा।संपातेन देवस्य जठरं, पश्चिमे अग्नौ ' ओं सुवः स्वाहा''''इति दध्ना तथाहुत्वा। उत्तरे अग्नौ 'ओं भूर्भुवः सुवः स्वाहा''''इति आज्येन तथा हुत्वा। संपातेन देवस्य शिरः,सर्वैः संपातैः सर्वाङ्गं च स्पृशेत्। तत्रैव गुडाज्यमधुभिः विष्णुगाय र्त्या प्रत्येकं तथा हुत्वा। संपातेन देवस्य मुखं सर्वाङ्गं च स्पृशेत्।

शाखाप्रोक्षण विधिः

तदनु आचार्यः वेदिकोपरि कोणभागस्थकुम्भजलैः विष्णुगाय त्र्या वेतस शाखया प्रतिमां सिञ्चेत्। मूर्तिपाश्च पालाश खदिराश्वत्थ बैल्व शाखाभिः पवमानादिभिः मन्त्रैः वेदिकोपरिस्थित दिक्कुम्भजलैः प्रतिमां सिञ्चेयुः।)लोहशिला दारुमयेषु एषः विधिः। बहुबेरं तु सदने अन्तः प्रविश्यैव संहारोत्पादनादिकं शान्तिहोमावसानिकं कर्म कुर्यात्।शय्यादिषु अन्तः परिवारेषु ब्रह्मादिषु च एवं पूर्वोक्तरीत्या तत्वन्यासः होमश्च कर्तव्यः। सर्वेषां प्राणप्रतिष्ठा होमन्यासकाले अर्घ्यादिभिः उपचारैः उपचर्य। चतुर्विधं अन्नं प्रणवेन निवेदयेत्। भोगिभोगे आसीने शयाने वा अनन्तस्यापि एवं एव कुर्यात्। ततः प्रतिष्ठा कर्म सिद्ध्यर्थं 'रक्षाबन्धनकर्म करिष्ये''''इति संकल्प्य। मूलभेरे यथाविधि रक्षाबन्धनं कृत्वा। अभिनवैः कम्बलैःवस्त्रैश्च 'युवा सुवासाः''''इतिप्रतिमां आच्छाद्य। द्वारि'ओं नमः सुदर्शनाय चक्रराजाय ज्वालामालिने हुं फट् स्वाहा'''' इति मन्त्रेण सुदर्शनं आवाह्यअभ्यर्च्य। चक्रमुद्रां प्रदर्श्य। तत्र बलिंच निक्षिपेत्।

महाप्रतिष्ठा विधाने तु इन्द्रादि परिवारेषु स्वस्वस्थानेषु स्थाप्येषु देवेन साकं यथायोग्यं जलाधिवास छायाधिवास नयनोन्मीलन स्नपनादिकं कर्म कृत्वा. तत्तत्स्थानस्य पुरतः भूमौ पूर्ववत् धान्यपीठान् कृत्वा। शयनसामग्रीसंपूर्णेषु तेषु चण्डादि द्वारपाल गरुड विष्वक्सेनावरणदेवान् महापीठादि पंचावरण बलिपीठान् च अधिवास्य तत्तत्स्थानानां पुरतः। कुण्डेषु स्थण्डिलेषु वा परिवारहोमं कुर्यात्। प्रत्यावरणं अष्टाशा-कुण्डेषु यथाक्रमं पलाश खादिराश्वत्थ प्लक्ष न्यग्रोध बिल्वोदुम्बर काश्मर्य समिदः स्युः। एताभिः समिद्भिः आज्येन चरुणा च वक्ष्यमाणैः मन्त्रैः प्रतिदैवतं अष्टोत्तरशताहुतीः गरुड विष्वक्सेन चण्डादीनां पलाशया आज्य चरुभ्यां पूर्व संख्यया वक्ष्यमाणैः मन्त्रैः पृथक् वृतैःब्राह्मणैः होमं कारयेत्।

गर्भगृहद्वारे ''ओं त्रों चण्डाय स्वाहा''''ओं प्रों प्रचण्डाय स्वाहा''अर्ध मण्डपद्वारे''ओं शं शङ्खिणेस्वाहा''''ओं चं चक्रिणे स्वाहा'' अधिष्ठाने गजाननादयः, वासुदेवादयः

पुरुषादयः वा, आग्नेयां ''ओं गजाननाय स्वाहा'' ऐशान्यां ''ओं अंबिकायै स्वाहा'' गोपुरोत्तरसाले सूर्यगाय त्र्या, दक्षिणे ईशाय दक्षिणामूर्तये वा, प्रतीच्यां उत्तरसाले सूर्याय, दक्षिण साले ओं चन्द्रमसे, अन्तर्मण्डप द्वारे ओं जयाय, विजयाय इत्यावरणदेवताः। आग्नेयां'ओंकामाय''याम्यां''ओं ब्रह्मणे'' नैऋते''ओं गजाननाय''वारुण्यां''ओं षण्मुखाय''वायव्ये''ओं दुर्गायै'' उत्तरे''ओं धनाधिपतये'' ऐशाने''ओं श'राय स्वाहा'' तत्रैव''ओं क्षेत्रपालाय'' उत्तरे ब्रह्मणे, ऐशाने''ओं महिषासुर मर्दिन्यै'''' नृत्तार्धमण्डपाग्रे मूलबेराभिमुखं''ओं वक्रतुण्डाय विद्महे सुवर्णपक्षाय धीमहि। तन्नो गरुडः प्रचोदयात् स्वाहा''तत्रांगणे नैऋते''ओं श्रीं श्रियै ''अङ्कणे स्वस्वाथानेषु इन्द्रादयः,

इन्द्रस्य''ओं त्रातारमिन्द्रं अवितारमिन्द्रं हवे हवे सुहवँ शूरमिन्द्रं हुवेन शक्रं पुरुहूतमिन्द्र स्वस्तिनो मघवाधात्विन्द्रः स्वाहा''

अग्नेः'' अयाश्चाग्नेस्यनभिशस्तीश्च सत्यमित्वमया असि अयसा मनसा धृतोयसा हव्यमूहिषे अयानोधेहि भेषजं स्वाहा''

यमस्य''यदुलूको यदि मोघमेतत् यत् कपोतः पदमग्ने कृणोति यस्यदूतः प्रहित एतत् तस्मै यमाय नमो अस्तु मृत्यवे स्वाहा''

निऋते,''असुन्वन्तमयजमानमिच्छस्तेनस्येत्यां तस्करस्यान्वेषि अन्यमस्मदिच्छ सात इत्यनमो देवि निऋतेतुभ्यमस्तु स्वाहा''

वरुणस्य ''इमम्मे वरुण''इत्यारभ्य आयुः प्रमोषीः स्वाहा.इत्यन्तेन

वायोः'' आनोनियुद्भिश्शतिनीभिरध्वरं सहस्त्रिणीभिः उपयाहियज्ञं वायो अस्मिन् हविषिमादयस्व यूयंपात स्वस्तिभिः सफ्दा नः स्वाहा''

सोमस्य''संतेपयांसिसमुयन्तुवाजाःसंवृष्णियान्यभिमातिपाहःआप्यायस्व अमृताय सोमदिवि श्रवांस्युत्तमानिधिष्व स्वाहा''

ईशानस्य ''तमीशानं जगतस्स्तस्थुषस्पतिं धियं जिन्वमवसेहूमहेवयं पूषानो यथा वेदसामसद्वृधेरक्षितापायु रधस्थःब्वस्तये स्वाहा''इदं एकावरण मात्रविषयम्।

अन्तर्हारोपेते धाम्नि तु अन्तर्मण्डल नाम्नि प्रथमावरणे गोपुरोत्तरसाले ''ओं पुरुषाय स्वाहा''दक्षिणसाले सत्याय, आग्नेये हयग्रीवाय, दक्षिणस्यां संकर्षणाय, नैऋते वराहाय, वारुण्यां प्रद्युम्नाय, वायव्ये अनन्ताय, उत्तरस्यां अनिरुद्धाय, ऐशान्यां नृसिह्माय, अङ्गणे इन्द्रादि पीठिकास्थानेषु ''ओं चक्रिणे स्वाहा''''ओं मुसलिने स्वाहा''''ओं शङ्खिणे स्वाहा''''ओं खड्गिने स्वाहा''''ओं हलिने स्वाहा''''ओं गदिने स्वाहा''''ओं पाशिने स्वाहा''''ओं वज्रिणे स्वाहा''अन्तर्हार धाम्नि द्वितीयावरणे गोपुरोत्तर साले सूर्याय, दक्षिणे चन्द्रमसे, आवरणे आग्नेय कामाय, याम्यां ब्रह्मणे, नैऋते गजाननाय, वारुण्यां षण्मुखाय, वायव्ये दुर्गायै, सौम्यायां धनाधिपतये, ऐशाने शराय, तदावरण गोपुर चतुष्टय द्वारपालाः-

पूर्वद्वारे पद्मधराय,गदाधराय,दक्षिणे खड्गधराय, शार्ङ्गधराय, पश्चिमे वज्रधराय, मुसलधराय, उत्तरे पाशधराय, अङ्कुशधराय,अङ्गणे पीठिकास्थानेषु इन्द्रादयः,मध्यान्तर्हारनाम्नि तृतीयावरणे गोपुरचतुष्टयद्वारपालाः-धात्रे, अर्यम्णे, विधात्रे, मित्रावरुणाय, भगाय, विवस्वते, पूष्णे, त्वष्ट्रे

अग्नियममध्ये-ओं धराय,ध्रुवाय,सोमाय अब्धः,अनलाय,प्रत्यूषाय,प्रभासाय,यम

निऋतिमध्ये-कव्यवाहे,अनलाय,सोमाय,अग्निष्वात्ताय,सोमपे बर्हिषदाय,

निऋतिवरुणमध्ये- रुद्राय,अग्नये,विष्णवे,वरुणवायु मध्ये आवहाय, विवहाय, उद्वहाय, संवहाय, निवहाय, अनुवहाय, व्यवहाय,

वायुकुबेरमध्ये-वसिष्टाय,वामदेवाय,जाबालये,काश्यपाय,भृगवे,जमदग्नये,भरद्वाजः

कुबेरेशानयोःमध्ये-मृगाय,व्याधाय,शर्वाय,निऋतये,ध्वजाय, एकपदे, अहये बुद्ध्याय, पिनाकिने, यवदाय, स्थाणवे, भगाय, कपालिने, तत्रैव- क्षेत्रपालाय,

प्रांगणे इन्द्रादि पीठिकास्थानेषु कुमुदादयः, मध्यमायां पूर्वादि सालगोपुरद्वारपालाः, पूर्वे दुर्जयाय, प्रबलाय,दक्षिणे-विश्वभावनाय,पुष्कराय,पश्चिमे-संभवाय, प्रभवाय, उत्तरे-सुशोभनाय, सुभद्राय। आवरण देवतास्तु-पूर्वे अनलाय,रवये,पुरन्दराय,अग्नये, अद्यः, आग्नेय, आदित्यादि नवग्रहेभ्यः याम्ये, अग्नये,वायवे,प्रजायै,सक्तये,नित्रृते अश्विभ्यां, वारुणेलक्ष्म्यै, सरस्वत्यै, विघ्नाय, वायव्येइन्द्रादयः, उत्तरस्यां वासुदेवाः, ओंब्रह्मणे मरीचये,अत्रये,विवस्वते पृथिवीश्वराय, चित्राय, अपवत्साय,संधात्रे,सवित्रे, रुद्राय,रुद्रराजाय, इन्द्राय, इन्द्रजयाय, ईशानाय, पर्जन्याय,जयन्ताय,महेन्द्राय,भानवे, सत्याय, भृषाय, अन्तरिक्षाय, अग्नये, पूष्णे, कुशाय, भानवे, गृहक्षताय, वमाय, गन्धर्वाय, भृङ्ग राजाय, मृगाय, सुग्रहाय, पुष्पदन्तकाय, वरुणाय, भृगवे, श्यावाय,यक्ष्मणे, मनोजवाय,रोगाय,नागाय,मृत्यन्ताय,फल्लाटाय,सोमाय, अदितये, वास्तुनाथाय, ऐशाने, सप्तविंशतिनक्षेत्रभ्यः, इन्द्रादि पीठिकासु, उपेन्द्राय, प्राकृताय, पुण्याय, पुष्कराय, विश्वभावनाय, असुरघ्नाय, कृतांताय, भूतनाथाय, महामर्यादाय, गोपुरद्वारपालाः, कुमुदादयः, आवरणे पूर्वाद्याशासु सिद्धेभ्यः, ऋषिभ्यः, नागेभ्यः, असुरेभ्यः राक्षसेभ्यः यक्षेभ्यः विद्यादारेभ्यः सौरभेयीभ्यः गुह्यकेभ्यः गन्धर्वेभ्यः अप्सरोभ्यः प्रजापतिभ्यः अङ्गने इन्द्रादि पीठिकासु विश्वेश्वराय, विश्वकृते, विश्वाय, विश्वात्मने, विश्वलोचनाय, विश्वपादाय, विश्वभुजाय, विश्वकर्मकृते, 'ओं महापीठे सर्वेभ्यः विष्णुपार्षदेभ्यः स्वाहा '''' ।

एतत् प्रथमावरणादि पञ्चमावरनान्तम्।एवं परिवार होमं प्रणवादि स्वाहान्तं स्वस्व मन्त्रेण पूजायां नमोन्तेन च ब्राह्मणैः कारयित्वा। तेभ्यश्च दक्षिणां दद्यात्। ततः व्रीह्यादिभिः धान्य पीठं विदाय। तस्मिन् दर्भान् आस्तीर्य। परिस्तीर्यच। तस्मिन् लक्ष्मी रूपां पिण्डिकां आधारशक्तिरूपां आधार शिलां च अधिवास्य पृथक् नवेन वाससा आच्छाद्य। पूर्ववत् स्थण्डिलं कृत्वा। तस्मिन् बहुबीज दातु लोह रत्नानि भाजने

निक्षिप्य। तद्वाससा आवेष्ट्य तत् निक्षिप्य। पूर्वं शय्यावेदिकायां शयनां प्रतिमां अभिनिकेतमुत्थाप्य। अर्घ्यादिभिः अभ्यर्च्य। पायसादि चतुर्विधं अन्नं निवेद्य। महाकुंभं च तथा संपूज्य। ततः पललचूर्ण लाज दधि सक्तुभिः बल्यन्नं संयोज्य।

आद्याश्च कर्मजाश्चैव ये भूताः प्राक्दिशास्थिताः।
प्रसन्नाः परितुष्टास्ते गृह्णन्तु बलिकाङ्क्षिणः।।
वृक्षेषु पर्वताग्रेषु ये विदिक्षु च संस्थिताः।
भूमौ व्योम्नि स्थिताये च बलिंगृह्णन्तु तेऽपि च।।
विनायकाः क्षेत्रपालाः ये चान्ये बलिकाङ्क्षिणः।
पूषाद्याः पार्षदाश्चैव प्रति गृह्णन्त्विमं बलिम्।।
चण्डाद्याः कुमुदाद्याश्च ये भूताः सर्वतः स्थिताः।
आगच्छन्तु पदे सर्वे गृह्णन्तु ते इमं बलिम्।।

इति गाथया सर्वतः दिक्षु बलिंदत्वा। ततः ओं नमो भगवते स्वप्नाधिपतये सुस्वप्नं ममकुरुस्वाहा'''' इतिमन्त्रेण आज्येन अष्टोत्तरशताहुतीः हुत्वा। अनन्तरं ''प्रतिष्ठार्थं''रक्षाबन्धन कर्मकरिष्ये इति सङ्कल्प्य, पुण्याहं वाचयित्वा, देवस्य देव्याश्च दक्षिणवामकरेषु क्रमेन हेममयं प्रतिसरंबद्धा, बालबिंबस्य पुरतः व्रीह्यादिभिः धान्यपीठिकां विधाय। तस्यां सलोहरत्नाश्वत्थ पल्लव कूर्चसोपकुंभाष्टकं सकरकं महाकुम्भं संस्थाप्य। उपकुंभाष्टके इन्द्रादीन् आवाह्य। अभ्यर्च्य। बालबिम्बं सम्पूज्य।तच्छक्तिं महाकुम्भे करके सुदर्शनं च आवाह्य। अभ्यर्च्य।तदनु मूर्तिपैः प्रतिकुण्डं पूर्णाहुतिश्च कारयेत्। तदानीं होमधूमः कमलकुवलयगन्धो यदि हुतवहः रत्नश्वेत वर्णः दक्षिणावर्त ज्वालावान् यदि च तदानीं अत्यन्तं शुभाय कल्पते। तदा

सवेद वाद्य घोषं 'सुस्वप्न सिद्यर्थं स्वापं करिष्ये'''' इति सङ्कल्प्य। भूमौ प्राचीनान् दर्भान् आस्तीर्य। तेषु आचार्य मूर्तिपयजमानाः स्वप्नार्थं शयिरन् ।

इति क्रियाकैरवचन्द्रिकायां शान्तिहोमविधिर्नाम सप्तदशपरिच्छेदः

****

क्रियाकैरवचन्द्रिकायां अष्टादशपरिच्छेदः

पीठस्थापनम्

अथ प्रभाते कृतकृत्यः आचार्यः रात्रौ सुस्वप्ने सति अविचारयन्। देवस्य प्रतिष्ठां आरभेत्। दुस्वप्ने शान्तिहोमं पूर्ववत् कृत्वातदन्वारभेत्। एकबेरे तु द्वारस्य दक्षिणे पूर्ववत् वास्तुहोमं कृत्वा। तदनु आचार्यः गर्भगृहं प्रविश्य। तन्मध्ये चतुरश्रां वृत्तां वा हस्त मात्र विस्तारायामयुतां निम्नचतुरावरणं शिलां विन्यस्य। वास्तु होमाग्नौ समिदाज्यचरुभिः विष्णुगायत्र्या प्रत्येकंशताहुतीः हुत्वा।

तच्छिलागर्तेषु प्रथमावरणे पूर्वादिषु यवव्रीहि निष्पाव प्रियङ्गु तिलमाष नीवार शालीनां अष्टानां बीजानि ।

द्वितीयावरणे वज्रमौक्तिक,वैडूर्य,स्फटिक,पुष्पराग,पद्मराग,चन्द्रकान्त,नीलानि अष्टौ रत्नानि।

तृतीयावरणे मनश्शिला हरितालाञ्जन श्याम सीस सौराष्ट्र रोचन गौरिकधातून् अष्टौ।

चतुर्थावरणे सुवर्ण रजत ताम्रायस्त्रपुस्वर्णनिर्मित कूर्म शङ्ख चक्राणि एतानि मध्यगर्ते शालि बीज पारद ब्रह्मराग काञ्चनानि च निक्षिप्य। स्त्रीशिलया श्रीसुक्तेन पिधाय। सुधया दृढीकृत्य।

ततः पुण्याहं वाचयित्वा। स्त्रीशिलां संप्रोक्ष्य। स्त्रीशिलापद्ममध्ये प्रणवं। कर्णिकायां अकारादीनि षोडशवर्णानि पूर्वादिषु दलेषु कादिक्षान्तानि च वर्णानि विन्यस्य।

तेषु दलेषु पूर्वादिषु - ओं विमलायै नमः, ओं उत्कर्षिण्यै नमः, ओं ज्ञानिन्यै नमः, ओं क्रियायै नमः, ओं योगात्मिकायै नमः, ओंप्रह्व्यै नमः, ओं सत्यायै नमः, ओं ईशान्यै नमः।

कर्णिकायां - ओं अनुग्रहशक्त्यै नमः, इति नवशक्तीः आवाह्य। गन्धादिभिः अभ्यर्च्य ।

पिण्डिकायां - ओं श्रीं श्रियै नमः इति आवाह्य। अभ्यर्च्य। नवेन वाससा आच्छाद्य। द्वारे पूर्ववत् सुदर्शनं अभ्यर्च्य। चक्रमुद्रां प्रदर्श्य। बहिः निर्गत्य।

शय्यावेदिस्थं देवं यथाविधि संपूज्य। द्वारतोरण कुंभस्थान् देवान् उद्वास्य। कुण्डस्थानपि उपरिष्टात्तन्त्रपूर्वकं देवस्य हृदये समारोप्य। महाकुंभोपकुंभान् अष्टम'लानि च उद्धृत्य। वहद्भिः मूर्तिपैः सह आचार्यः स्वयं करकं गृहीत्वा। अविच्छिन्नगलन्तिनिर्गलितवारिधारया अग्रे मार्गं सिञ्चन् गेहं प्रदक्षिणी कृत्य, गर्भमन्दिरं प्रविश्य। तत्र धान्य पीठे कुंभान् क्रमेण संस्थाप्य। पुनः शय्यावेदिस्थ देवनिकटं आसाद्य।

ब्राह्मणानुज्ञानुपूर्वकं देवं हस्ताभ्यां 'उत्तिष्ट ब्रह्मणस्पते''''इत्युत्थाप्य। छत्र ध्वज पताकाद्यैः अखिल वाद्यघोषैः ब्रह्मघोषैः अनूचानैः ब्राह्मणैः वैष्णवैः अधीयानैः मूर्तिपैश्च साकं आचार्यः षड'न्यासादिकं कृत्वा। गेहं प्रदक्षिणी कृत्य। मूलमन्दिरं प्रविश्य। तत्र गर्भगृहद्वारि देवं अर्घ्यादिभिः संपूज्य। अन्तः प्रवेश्य। पिण्डिकां प्रदक्षिणी कृत्य। सुमुहूर्ते 'प्रतिष्ठासि''''' इति साम ' आत्वाहार्षं ''''इति,'ध्रुवाद्यौः''''' इति मन्त्रान् गुर्वनुज्ञया। मूर्तिपेषु पठत्सु। आचार्यः देवस्य पुरतःस्थित्वा।''ओं लां नमःपराय सर्वात्मने नमः''इतिमन्त्रेण पिण्डिकायां देवं संस्थाप्य। देवस्य स्थिते समतां ऊर्ध्व लंबित सूत्रेण निश्चित्य। पिण्डिकानालरन्द्रं लाक्षासर्जरससिक्त कुरुविन्दगुग्गुलु गैरिक गुडतैल दृडपेषण जनितेन अष्टबन्धनेन दृढीकृत्य। पुण्याहं वाचयित्वा। प्रोक्ष्य। अनन्तरं देवं आवाहयेत्।

आवाहयामि तं देवं तमसः परमव्ययम्।

आनन्दं सर्वगं नित्यं व्योमातीतं परात्परम्।

मरीचि चक्रमध्यस्थं वासुदेवमजं विभुम्।''इति ध्यात्वा।

द्विषड्कमनुना देवमावाह्य। ब्रह्मरन्ध्रेण प्रतिमां प्रविष्टं ध्यात्वा। कुम्भस्थं देवं प्रतिमायां मूलेन संयोज्य। देवस्य तेनैव न्यासं कृत्वा। सान्निध्यं प्रार्थ्य। पूर्वोक्तविधानेन परिवार कल्पने च विधाय। देवं अर्घ्यादिभिःअभ्यर्च्य। पायसान्नं निवेद्य। प्रत्यग्रैः वसनैः कम्बलै र्वा ''युवा सुवासाः''इति मन्त्रेण परिवेष्ट्य। दिनत्रयं गर्भमन्दिर द्वारं कवाटेन बन्धयेत्। तदा ब्राह्मणानपि वित्त गो भोजनादिभिः तोषयेत्।

चतुर्थे अहनि प्राप्ते प्रातरेव कवाटं उद्घाट्य। देवस्य स्नपनं यथाविधि कृत्वा। तद्दिने ध्वजारोहणं कृत्वा। अयं विधिः एकबेरमात्रमेव कार्यः।

बहुभेरविधाने तु बिम्बं चित्रादिकं चेत् रत्नन्यासःशूलस्थापन वेलायामेव कार्यः। प्रतिष्ठा समये गर्भगेहं प्रविश्य। मार्जनालेपनादिभिः संशोध्य। तत्र चन्दनाद्रानि सूत्राणि प्रागुदङ्मुखानि अष्टौ अष्टौ निपात्य।तेषु एकोनपञ्चाशत्कोष्ठेषु मध्यभागः ब्राह्मः। द्वितीयः दैवः,तृतीयः मानुषः,तुर्यःपैशाचः। ब्राह्मे अर्चनापीठः,दैवे स्थितिः, मानुषे परिवारः,पैशाचे आयुधानि, किंचित् मानुषाश्रित्य दैवे आसनं, दिव्य मानुषयोःशय्या, पैशाचे यानं दैवे देव्यः, आसीने देवे आसीनाः, स्थिते स्थिताः पार्श्व,शयाने यानारूढे च देवे देव्यः यथाभिमतं कल्पनीयाः।

यद्वा- उदङ्मुखानि दश प्राङ्मुखानि तावन्ति सूत्राणि निपात्य। तेषु एकोत्तराशीति कोष्ठेषु मध्यमः भागः ब्राह्मः द्वितीयः दैवः,तृतीयः पैतृकः, तुरीयः मानुषः,पञ्चमः पैशाचः,इति भागान् कृत्वा। एकबेरस्य ब्राह्मो भागः, बहुभेरस्य दैविकः, दैव मानुषयोः आसनं, दैवमानुष पैतृकेषु शयनं, मानुष पैशाचयोः यानं इति वा कुर्यात्। उक्तस्थानविपर्यये राजराष्ट्रं विनश्यति। तस्मात् यथाशास्त्रं साधयेत्।

नपुंसक शिलायां पूर्ववत् रत्न न्यासः। स्थितस्य पादमूले च अन्येषां आसनादीनां पूर्वं रत्नानि भाजने अधिवास्य। पृष्टतः एव रत्न न्यासं कुर्यात्। कर्माद्यर्चाः तु महाकुम्भोपकुम्भकरकैः साकं समुद्धृत्य मूत्रितपैः साकं स्वयं आचार्यः करकं गृहीत्वा। स वेद वाद्यघोषं देवस्य अग्रे अविच्छिन्नया गलन्तिकागलत वारिधारया मार्गं सिञ्चन् स्वस्य बिंबस्य च अन्तरा पथि कश्चिदपि यथा न गच्छेत्। तथा देवागारं प्रादक्षिण्येन प्रविश्य। तत्र द्वारिदेवं अर्घ्यादिभिः अभ्यर्च्य। अन्तः प्रविश्य। कर्मार्चां अर्चनापीठे नृसूक्तेन निवेश्य।

उत्सवाद्यर्थ बिम्बानि च तत्पार्श्वयोः निवेश्य। धारावशिष्टं गलन्तिकोदकं शरावे निक्षिप्य। शलाकिका मात्रया धारया मूलमन्त्रेण बिंबानां परिषेचनं कृत्वा। देवस्याग्रे धान्यराशिषु कुम्भान् निक्षिप्य। वक्ष्यमाणेन विधिना आवाहयेत्।

आचार्यः सुमुहूर्ते मूलबेरस्य पुरतः स्थित्वा। पद्मासनम् बद्ध्वा।

प्राणानायम्य। सनातनं ब्रह्मम् ध्यायेत्।

वासुदेवमजं शान्तं उज्ज्वलं सन्ततोदितम्।

अनादिमध्यनिधनं एकं व्याप्याचलं स्थिरम्।

चिद्घनं परमानन्दं तमसः परमव्ययम्।

ज्ञानशक्ति बलैश्वर्य वीर्यतेजस्समन्वितम्।

अपादपाणि अस्पृश्यं अचक्षुश्श्रवणादिकम्।

सर्वत्र करवाक्पादं सर्वतोक्षिशिरोमुखम्।

सदागतिविनिर्मुक्तं रविकोटि समप्रभम्।

चैतन्यं सर्वगं नित्यं व्योमातीतं तदद्भुतम्।

चित्सामान्यं जगत्यस्मिन् मूलमन्त्रात्मकं परम्।

एवं विधं सदाविष्णुं आह्लादं प्रणवात्मकम्।।एवं सम्यक् ध्यात्वा।

सदाविष्णुं महाविष्णौ नियोज्य।महाविष्णौ विष्णौ नियोज्य। विष्णुं स्वहृदयकमले,''ओं यां नमः पराय पुरुषात्मने नमः' 'इत्यावाह्य। अञ्जलिंकृत्वा। अञ्जलिमध्ये पद्मासनं विचिन्त्य। तद्भद्रासनं ध्यात्वा। तस्मिन् स्वहृदयकमल स्थितं विष्णुं ''ओं रां नमः पराय विश्वात्मने नमः''इत्यावाह्य।तं अञ्जलिस्थं ''ओं यां नमः पराय निवृत्यात्मने नमः''इति प्रतिमायां ब्रह्मरन्द्रमार्गेण प्रविष्टं विचिन्त्य।''ओं लां नमः पराय सर्वात्मने नमः''इति बिंबं सर्वतः व्याप्य स्थितं स्मृत्वा। महाकुम्भगतां शक्तिं, कुम्भावाहित बालकौतुक शक्तिं, मूर्तिकुम्भगताः शक्तिश्च तत्तत्कुम्भगत जलस्थितकूर्चैः मूलेन देवेन संयोज्य। बिम्बब्रह्मरन्ध्रं प्रणवेन पिधाय। आवाहन स्थापन मुद्रे प्रदर्श्य। 'जितं ते'''' इति स्तुत्वा। प्रतिमामुद्रां प्रदर्श्य। देवं आत्मनः अभिमुखं ध्यात्वा। प्रणम्य उत्थाय। सन्निधान सन्निरोधन, साम्मुख्य, प्रार्थनामुद्राः प्रदर्श्य। ''स्वागतंभगवतः'' इत्युक्त्वा स्वागतमुद्रां प्रदर्श्य । देवस्य मूलमन्त्रेण यथाविधि न्यासं कुर्यात्। स्थितौ स्थितिन्यासः, आसने सृष्टिन्यासः संहार शयने संहृतिन्यासः,सृष्टिशयने सृष्टिन्यासः, भोगशयने योगशयने विश्वरूपे च स्थितिन्यासः। यानारूढे न्यासत्रयम्। यद्वा आसनादिषु सर्वत्र स्थितिन्यासः एव कार्यःश्यादिदेवीनां ब्रह्मादीनां च महाकुम्भजलेन स्वस्वनाम मन्त्रेण प्रोक्ष्य। शय्यादीनां षडङ्ग न्यासं, ब्रह्मणः सृष्टिन्यासः रुद्रस्य संहारन्यासं च कुर्यात्। चण्डप्रचण्ड गरुड विष्वक्सेनादि सर्व परिवारान् स्वे स्वे स्थाने संस्थाप्य। आचार्यः स्वयमेव महाकुम्भं गृहीत्वा। तज्जलेन कूर्चेन चण्डादि परिवाराणां प्रणवादि नमोन्तेन स्व स्व मन्त्रेण तत्क्षणे एव प्रोक्षणं कृत्वा। अवशिष्टं महाकुम्भजलं बलिपीठे संसिच्य। महानसाग्नि कुण्डे अधिश्रपणे च गार्हपत्याग्निं संस्थाप्य। आचार्यः यजमानेन सह देवस्य पार्श्वं आसाद्य। प्रणम्य। उत्थाय। अञ्जलिं बद्धा। इमां गाथां उदीरयेत्।

भक्तवत्सल भक्तामभिप्रेतार्थ साधक।

प्रार्थये त्वामहं देव! मदनुग्रहकाम्यया।।
सन्निधत्स्व चिरंस्थाने कल्पिते श्रद्धया मया।
प्रसीददेव देवेशपूजामपि गृहाण मे।
ग्रामस्य राज्ञः राष्ट्रस्य प्रजानां इन्दिरावर।
देहि पुष्टिं च तुष्टिं च गतिं च परमां तथा।

इति विज्ञाप्य। देवाय मधुपर्कं निवेदयेत्। तदानीमेव आचार्यानुज्ञया यजमानः भक्तिनम्रेणशिरसा देवस्य दक्षिण हस्ते तोयपूर्वं यथावित्तानुसारतः गो भू हिरण्यादि पूजोपकरणानि आत्मानं पुत्रपौत्रदारादीन् हस्त्यादि वाहनानि दासीदासान् च सर्वस्वं देवस्य पार्श्वतः आनीय (आचार्येण)दद्यात्। एवं आचार्यमपि पूजयेत्।
ततः आचार्यः स्वर्णादिपात्रं विष्णुगायत्र्या प्रक्षाल्य। देवस्य पुरतः धान्यराशौ तत् 'अस्मद्गुरुभ्यो नमः'''' इति संस्थाप्य। गन्धोदकेन आपूर्य। तस्मिन् परमात्मानं आवाह्य। वेदादिना गन्धादिभिः अभ्यर्च्य। यजमानं आहूय,देवस्य अभिमुखं स्थापयित्वा। तस्य अञ्जलिंसपुष्पेण अर्घ्यजलेन संपूर्य।इमां गाथां उदीरयेत्।

त्वया विना नमे किञ्चित् मां विना तवकस्तथा।
तस्मान्मामात्मसात्कर्तुं प्रसीद परमेश्वर।
भूमौ स्खलितपादानां भूमिरेवावलंबनम्।
त्वयि विप्रतिपन्नानां त्वमेव शरणं विभो।

इत्याचार्यः देवं विज्ञाप्य। द्वादशाक्षरमन्त्रेण यजमानस्य आत्मानं अञ्जलिस्थ पुष्पाघ्र्यजलेन सह देवपादपङ्कजे, 'अस्मद्गुरुभ्यो नमः''''इति समर्पयेत्। प्रतिष्ठान्ते

नृत्तगीतवाद्यघोष नानाविधस्तोत्रादिभिः उपचारैः देवं तोषयित्वा। चतुर्विधं अन्नं विधिवत् निवेद्य। महानसे अग्नियमयोःमध्ये चतुरश्रकुण्डे नित्याग्निं प्रतिष्ठाप्य। संस्कृत्य। समिदाज्यचरुभिः मूलमन्त्रेण यथाविधि पूर्णाहुत्यन्तं हुत्वा। बलिपीठान् संस्कृत्य। तत्तदावरणेषु प्रतिष्ठाप्य। तेषु नित्यं यथाविधि बलिं दद्यात्। बहुबेर प्रतिष्ठायां तु कवाटबन्धनं न कुर्यात्। चतुर्थे दिवसे प्राप्ते उत्तमत्रितयेन, मध्यमत्रितयेन वा देवं चतुस्स्थानार्चनपूर्वकं कलशैः यथाविधि सम्स्नाप्य। तदन्ते ध्वजारोहण पूर्वकं उत्सवं कारयेत्।

तदनु यजमानः तस्मिन् समये सुवर्णकुसुम वस्त्र अङ्गुलीयक कुण्डलक्षेत्रारामगृह दासीदास शिबिका गज तुरगादिभिः जीवाजीव धनैः च,आचार्यं तोषयित्वा। तस्मै च आत्मानं पुत्रदारादि निरपेक्षः सन् निवेद्य। गुरुं मातृत्वेन पितृत्वेन च संभाव्य। प्रणम्य.तस्मैधेनूनां सहस्रं, अथवा निष्कानां उत्तमां दक्षिणां,तदर्धं वा, अर्धार्धं वा दद्यात्।

अत्र श्रियादिदेवीनां देवेन साकं कल्पने विवाहकर्म न कुर्यात्। पृथक् चेत् उद्वाहकर्म अङ्कुरपूर्वकं यथाविधि कुर्यात्।

कर्षणादिप्रतिष्ठान्तं अङ्गत्वेन यदाहृतम्।

तदिष्टशिष्टं सकलं गुरोरेव धनं भवेत्।

इति वचनात् सर्वमपि गुरवे दत्वा.मूर्तिपानां परिचारकाणां अन्येषां नृत्तगतिरतानां सदस्यानां च यथावित्तानुसारतः दक्षिणाम दत्वा। तदनु देवं स्तुत्वा। प्रणम्य। देवेन अनुग्रहीतः यजमानः गुरुणा सह कन्यका गो भू हिरण्यादीनि दानानि देवसन्निधौ द्विजेभ्यः दत्वा। बहिः निर्गत्य कृतकृत्यः देवं आचार्यं च नमस्कृत्य। गुरुं शिभिकादिकं आरोप्य। वाद्यघोष पुरस्सरं ग्रामं प्रदक्षिणी कृत्य। तद्वेश्म प्रवेशयेत्।

स्थापकः देवदेवस्य यः पूर्वं देशिकोत्तमः।

तेनैवाराधनं कार्यं तद्वंश्यैरपि निर्गुणैः।

पूजा प्रीतिकरी सैव देवस्य कमलासन।

आदौ विभूति विस्तारः यादृशः परिकल्पितः।

संकोचमन्तरेणैव कुर्यात् तादृशसंपदः।

देवभूत्यनुसारेण रचेत् देवोपजीविनः।

न क्लेशयेत् भागवतान् तथैव परिचारकान्।

इति श्री वराहगुरुणा विरचितायां क्रियाकैरव चन्द्रिकायां

प्रतिष्ठाविधिः नाम अष्टादश परिच्छेद:

****

अथ एकोनविंशः परिच्छेदः

मत्स्यादिमूर्ति प्रतिष्ठा विधिः

अथ विभवमूर्तिस्थापनविधिः उच्यते-

मत्स्यादिमूर्तीनां महाप्रतिष्ठायां इव अधिवासादिकं सर्वमपि कुर्यात्।अत्र तु विशेषः कथ्यते।

मत्स्यमूर्तिः वारुण साम्ना नृसूक्तेन महाकुम्भं अभिमन्त्र्य। तस्मिन् ''ओं नमोभगवते म्यूं मत्स्यरूपाय'''' इति वा मूलमन्त्रेण वा समावाह्य। आचार्यः कुम्भजलेन प्रोक्ष्य।

मीनात्मने नमस्तुभ्यं वेदरक्षाविधायिने।

प्रलयार्णव दुर्वारवारिपूरविहारिणे।.''इति मन्त्रेण उपतिष्ठेत।

कूर्मस्य, वारुणसूक्तेन महाकुम्भं अभि मन्त्र्य।अष्टाक्षर विद्यया समावाह्य।कर्मावसाने,

''तुभ्यं नमस्क्रियां कुर्मः कूर्मरूपाय वेधसे।

धारिणे मन्दरस्याद्रेः विबुधानन्ददायिने।''इत्युपतिष्ठेत।

वराहस्य,वराहरूपिणं महाकुम्भे पुरुषसूक्तेन आवाह्य।कर्मावसाने,

क्रोडात्मने नमस्तुभ्यं यज्ञदेहाय(वज्ररूपाय)वेधसे।

दंष्ट्राग्र विधृताशेष धरणीधरणीधर।''इति उपतिष्ठेत।

नृसिह्मस्य,नृसिह्मरूपिणं महाकुम्भे,''युञ्जते''इति अनुवाकेन समावाह्य।कर्मावसाने,

निशातनखदंभोलिदलितासुरवक्षसे।

दर्शिताश्रितवात्सल्य नृसिह्मवपुषे नमः।''इत्युपतिष्ठेत।

वामनस्य,वामनं महाकुम्भे''युञ्जते''इति अनुवाकेनसमावाह्य।कर्मावसाने,

''बलिद्विषे नमस्तुभ्यं परित्रातवलद्विषे।

वामनाय महाकाय वञ्चिताशेषमानव।''इति उपतिष्ठेत।

भार्गवरामस्य,जामदग्न्यंमहाकुम्भे पौरुषेणसूक्तेन आवाह्य,कर्मावसाने,

त्रिसप्तकृत क्षत्राणां निहन्त्रे तिग्मतेजसे।

नमस्तुभ्यं भगवते परश्वथविधारिणे।''इति उपतिष्ठेत।

राघवस्य,रामं सीतालक्ष्मणादिभिःसहितं वा महाकुम्भे पौरुषेनसूक्तेन

आवाह्य,कर्मावसाने,

नमस्तुभ्यं भगवते राघवाय महात्मने।

रावणादि जगद्वेषि निबर्हणमहौजसे।।''इति उपतिष्ठेत।

रामप्रतिष्ठा पृथक् चेत् परिवारात्मनःहनूमत्प्रमुखान् च प्रतिष्ठापयेत्।

प्रथमावरणे प्राच्यां भरतं, दक्षिणे जानकीं, प्रतीच्यां जाम्बवन्तं, उदीच्यां लक्ष्मणं,

आग्नेयादिविदिक्षु सुग्रीव, विभीषण, नल,शत्रुघ्नान्च संस्थाप्य। द्वितीयावरणे पूर्वादिदिक्षु

वसिष्ठ, वामदेव, जाबालि,गौतम, भरद्वाज, कौशिक, वाल्मीक, नारदान्,

तृतीयावरणे इन्द्रादिलोकपालान्,गरुडस्थाने हनूमन्तं,विष्वक्सेनस्थाने नीलं गुहं वा स्थापयेत्। उत्सवे तु ध्वजपटे गरुडं हनूमन्तं वा लिखित्वा ध्वजारोहणं कुर्यात्।

बलरामस्य,बलरामं पूर्ववत् कुम्भे समावाह्य।कर्मावसाने,

बलिने बलबद्राय नमः शेषमहाहये।

तुभ्यं मालेव महती धरा येन शिरोधृता।''इति उपतिष्ठेत।

कृष्णस्य,कृष्णं भगवद्विम्बवत् संस्थाप्य।कर्मावसाने,

वृष्णिवर्याय कृष्णाय नमस्तुभ्यं मधुद्विषे।

भूभार भूतकंसादि महासुरनिघातिने।।''

इति उपतिष्ठेत।रुक्मिणीसत्यभामादीनां श्रियादीनामिव उद्वाहकर्मकुर्यात्।

कल्किविष्णोः पूर्ववत् कृत्वा।कर्मान्ते,

म्लेच्छानामुपसंहत्रे साधूनां स्थितिहेतवे।

नमस्तुभ्यं भगवते भूसुरान्वय जन्मने।।''इति उपतिष्ठेत।

मत्स्यादि दशमूर्तीनां षोडशन्यासः न इष्यते। लोहबिंबानां च।

तासां शिलामयीनां वर्णचित्रणं यदि, अधिवासादिकं कर्म पूर्वं कृत्वा पश्चात् वर्णलेपनं विधाय। अनन्तरं आवाहनादिकं कुर्यात्। ध्रुवबिंबस्थितेः भिन्नकाले कर्माद्यर्चास्थापनं यदि, तासां पृथगेव शयनादिकं कुर्यात्। ब्राह्मेकर्मार्चां, याम्ये उत्सवकौतुकं, उत्तरे तीर्थस्नपनबिंबे, दक्षिणे शयनोत्थापन बिंबे, बलिबिंबं च अन्यानि लोहबिंबानि लौकिकानि इष्टभूमिषु च स्थापयेत्।

यद्वा उत्सवार्थबिंबानि द्वारपार्श्वयोः वा, अभिषेकमण्डपे वा दक्षिणाभिमुखानि स्थापयेत। जलाधिवासयोग्यानां तु छायाधिवासनं कूर्चादर्शमण्डल स्नपनं कूर्चद्वारा शयनाधिवासं च कृत्वा, सर्वं अवशिष्टं षोडशन्यास चतुर्थस्नपनवर्जितं पूर्ववत् कुर्यात्।

वटपत्रशायिनस्तु गर्भमन्दिरोदरे अभितः वारिधं विलिख्य। तद्दले शयानं श्यामलं कोमलाकृतिं बालवपुषं देवं चित्राभासेन कल्पयित्वा। द्वारपार्श्वयोः मार्कण्डेयं महीं च विलिख्य चित्राभासोक्तविधिना प्रतिष्ठा कर्म कुर्यात्।

अथ लक्ष्म्यादीनां प्रतिष्ठाविधिः उच्यते

देवस्यदेवीनां च स्थापनं यदिसमानकालीनं तदा देव्याः सहैव शयनम्।कालभेदे तु पृथगेव कुर्यात्। पूर्ववत् समध्यवेदिकं मण्डपं कल्पयित्वा। तस्मिन् वेदिकायां शाययित्वा। प्रागादि तोरणेषु बलाकिनी वनमालिनी विभीषिका शा'रीः,द्वारकुम्भेषु द्वन्द्वशः ज्येष्ठाविद्या श्रद्धा कान्ति श्री तुष्टि क्षमा वृद्धिः। पूर्वादि ध्वजेषु द्वन्द्वशः, धृति लज्जा जया माया सावित्री क्षमा शुद्धि श्रद्धाश्च संपूज्य। प्रागादि होमकुण्डेषु लक्ष्मी,सरस्वती,पुष्टि,तुष्टिश्च आवाह्य। स्वस्व मन्त्रेण होमः कार्यः। कलश देवतास्तु वागीश्वरी क्रिया कीर्ति लक्ष्मी सृष्टि प्रह्वी सत्या ब्राह्म्यः। महाकुम्भे श्रीदेवी। एवं विधिवत् संपूज्य। षोडशन्यासरहितं शेषं कर्म पूर्ववत् कुर्यात्।

एषः विधिः अस्वातन्त्र्ये,स्वातन्त्र्ये तु ग्रामे वा नगरे वा पत्तने वा आलये श्रियः स्थापनं ग्रामाभिमुखं कल्पयित्वा। विमानोपरि चतसृषु दिक्षु तुष्टि पुष्टि सावित्री वाग्देवीः,कोणेषु सिह्मं वैनतेयं वा कल्पयित्वा। तत्र ब्राह्मे स्थाने शिलादिमयीं प्रतिकृतिं स्थापयित्वा। स्वस्वस्थानेषु परिवारान् द्वार पार्श्वयोः चण्डीं प्रचण्डीं अर्धमण्डप द्वारे दक्षिणे बलाकिनीं, उत्तरे वन्यमालिनीं, प्रथम गोपुरद्वारे विभीषिकां शाङ्गधारीं, द्वितीय गोपुरद्वारे शङ्ख पद्मनिधीं, तृतीयगोपुरद्वारे नलकूबर जृंभलौ, चतुर्थगोपुरद्वारे शिभिकुण्डल मणिभद्रौ, पञ्चमगोपुरद्वारे जयां विजयां विष्वक्सेन स्थाने चतुर्भुजां वामेन वेत्रं, इतरेणहस्तेन तर्जनं च कुर्वतीं। अपराभ्यां हस्ताभ्यां पद्मे दधानां, पीतवर्णं सुमुखीं स्थापयित्वा। प्रासादमुखमण्डपे वैनतेयं। आदिमूर्तेरिव परिवारां च कल्पयित्वा।

स्वातंत्र्ये एवं कल्पयित्वा। चतुर्थे अहनि स्नपनं कृत्वा। तद्दिने ध्वजमुत्थाप्य महोत्सवं कुर्यात्।

इति श्री वराहगुरुणा विरचितायां क्रियाकैरव चन्द्रिकायां

विभवमूर्ति श्रीदेवी प्रतिष्ठाविधिः नाम एकोनविंशः परिच्छेदः

****

अथ विंशः परिच्छेदः

पाणिग्रहण विधिः

अथ श्रियादि देवीनां पाणिग्रहण विधिः उच्यते-यथोक्तदिवसे अङ्कुरार्पणं कृत्वा। आचार्यः उद्वाहदिवसे शुभे मुहूर्ते देवस्य देव्याश्च संकल्प पूर्वकं पृथक् उद्वाहकौतुकं यथाविधि बद्धा। देवं क्षौमवस्त्रोत्तरीय किरीटहारकुण्डलाद्याभरण गन्धपुष्पाद्यैः अलङ्कृत्य। वैवाहिक सदनं प्रवेश्य।तत्रदेवं अर्घ्यादिभिः अभ्यर्च्य। स्थण्डिलं कल्पयित्वा।उल्लिख्य अग्निं प्रतिष्ठाप्य। आचार्यः देवेन सह अन्तर्गर्भगृहं प्रविश्य।देवमासने विनिवेश्य। देवीम्नूतनेन वाससा ''युवासुवासाः'' इतिमन्त्रेण प्रदक्षिणं परिधाप्य। आचमय्य। आभरणपुष्पाद्यैः अलङ्कृत्य।आचार्यः स्वयंदेवीं देवेन वेदादिना संयोज्य। तदनु यजमानः प्राणानाम्य। संकल्प्य। जगत्कारणभूताय देवाय मदीयां गोत्रजां कन्यकां प्रजासहत्वकर्मभ्यः प्रतिपादयामि''''इति देवीं सर्वाभरणसुवर्णगोभूसहितं सहिरण्योदकं देवाय दद्यात्। ततः गृहीतपाणिं देवं देवीं च मन्दिरात् कल्याणमण्डपं प्रापय्य। आचार्यः देवं देवीं च आसने विनिवेश्य।स्वयं उत्तराशाभिमुखः सन् प्रानानायम्य।संकल्प्य। पूर्वोक्तवङ्नौ परिस्तीर्य।पुरस्तात्तन्त्रम् कृत्वा विध्युक्तवर्त्मना क्रमेण आधार होमम् नृसूक्तेन समिद्भिः षोडशाहुतीः चरुणा विष्णुगाय त्यां चतुर्विंशत्याहुतीः, श्रीसूक्तेन घृतेन पञ्चाशताहुतीश्च जुहुयात्।

श्रीभूम्योः युगपत् उद्वाहकर्म यदि उभयोरपि अङ्कुरादिकं सर्वं पृथगेव कुर्यात्।एककृत्वे एककालीनत्वे च सति श्रीभूम्योः अङ्कुरादिकं सर्वं पृथगेव।एकस्मिन् काले पर्यायेण यदि तत्रापि भिन्नमाचरेत्। आनुपूर्वावशेनापि कर्म विभक्तमेव स्यात्।

यद्वा मुहूर्ते भिन्ने तु वैवाहिकं कर्म भिन्नमेव। मुहूर्तयोः यौगपद्ये क्रियां आनुपूर्व्या कुर्यात्। श्रीभूम्योः भिन्नकर्तृत्वे यौगपद्योद्वाहेऽपि श्रीभूम्योः प्रतिसरः पृथगेव। देवस्य तु एक एव।तयोरपि एकाग्नौ भिन्नाग्नौ वा यथाभिमतं उल्लेखनादि पुरस्तात्तन्त्रम् कृत्वा।श्रीभूम्योः अपि पारतन्त्र्ये सर्वाः क्रियाः प्रतिव्यक्ति पृथगेव पूर्वं श्रियै पश्चात् भूम्यै च पर्यायेण कुर्यात्।

भूमेस्तु उद्वाहे भूमिमन्त्रेण समिद्भिः षोडशाहुतीः विष्णुगाय र्त्या चरुणा चतुर्विंशत्याहुतीः पुरुषसूक्तेन घृतेन षोडशाहुतीश्च हुत्वा। ततः विष्णुसूक्तेन लाजहोमं कृत्वा। अग्निं प्रदक्षिणी कृत्य। आचार्यः लाजशेषं प्रणवेन सकृत् हुत्वा।''''इमं मे वरुण''''तत्वायामि''''त्वन्नो अग्ने''''सत्वन्नो अग्ने''''त्वमग्ने अयासि''इति पञ्चवारुणिकैः घृतेन हुत्वा।पञ्चोपनिषण्मन्त्रैः प्रायश्चित्ताहुतीः द्वादशाक्षरमन्त्रेण पूर्णाहुतिं च हुत्वा।ब्राह्मणान् तोषयित्वा। देवं अर्घ्यादिभिः अभ्यर्च्य। घृतारोपणं आचरेत्। घृतारोपणं यथा-घृतदूर्वाङ्कुरचन्दन शालितण्डुलानि पात्रे निधाय।हस्ताभ्यां तत् आदाय।आचार्यः देवस्य, देव्याश्च अङ्गेषु''सुमङ्गलं'''' इति दूर्वां, पादयोः ''सुशोभनं'' इति घृतम्कट्यां 'सुभद्रं'''' इति चन्दनं मूर्ध्नि' सुमङ्गलम् इति शालितण्डुलानि च क्षिप्त्वा।सर्वैः सभ्यैः अपि यथा कारयित्वा। 'रसेनास्मि'''' इति मधुपर्कम् निवेद्य।लक्ष्मीपतिं च आभरणाद्यैः अलङ्कारैः प्रसाध्य।यथार्हैः माल्यानुलेपनाद्यैः अपि अलङ्कुर्यात्।यजमानः देवं प्रणम्य।तस्मै धेनुः गुरवे यथावित्तानुसारतः दक्षिणाम् दद्यात्।ततः आचार्यः हरेः नीराजनं दत्वा। दिक्षु पिण्डिकाक्षेपणं कृत्वा। लौकिकेनमार्गेण अन्यत् सर्वमपि विधाय। श्रीभूमि सहितं देवं ग्रामधाम प्रदक्षिणम्

कारयित्वा।मण्डपे देवं देव्यौ च आरोप्य। राजोपचारैः उपचर्य। महाहविः निवेद्य। अन्ते ब्राह्मणान् भोजयेत्। एवं दिवसे दिवसे स्नपनम्,अहर्निशं पूर्ववत् होमम् उत्सवम् च कृत्वा। तुरीयादिनापररात्रौ समिदाज्यचरुभिः लाजेन च मूलमन्त्राभ्यां पृथक् अष्टोत्तरशताहुतीः हुत्वा। ततः पञ्चोपनिषदैः अपि हुत्वा।पञ्चमेदिवसे देवम् देव्यौ च तैलेन अभ्यर्च्य। विधिवत् सुस्नाप्य।महाहविः निवेद्य।ग्रामे महोत्सवं कुर्यात्। ततः आरभ्य श्रीभूमि सहितं देवं मन्दिरे अभ्यर्चयेत्।इतरासां देवीनां च एतादृशाःएव विधिः। जामदग्न्यादि देवीनां उद्वाहं स्मार्तवर्त्मना कुर्यात्।

इति श्रियादि देवीनां पाणिग्रहणविधिः नाम विंशः परिच्छेदः

****

अथ एकविंशः परिच्छेदः

विमान प्रतिष्ठा विधिः

अथ विमान प्रतिष्ठाविधिः उच्यते

महाप्रतिष्ठायां इव विमानस्य पुरतः मण्डपमध्ये चतुर्हस्तमायतम् एकहस्तोत्सेधं मध्यवेदिकायुतं चतुर्भिः अष्टभिः वा कुण्डैः युतं कल्पयित्वा। तत्र प्रतिष्ठोपयुक्तानि पालिकाघटिका शरावाष्टधान्यकुम्भ कलशकरक शालितण्डुल तिल नववस्त्र नवरत्न तोरण ध्वजाष्टमङ्गल स्नपनद्रव्य स्रुक्स्रुव समिद्दर्भकुसुम घृतदीपस्तंभासनादीनि अन्यानि च द्रव्याणि सम्पाद्य। आचार्यः यजमानानुज्ञया मूर्तिपैः सह कर्मारंभदिनात् पूर्वं द्वादशाहे, नवाहे, सप्ताहे, पञ्चमेऽहनि, तृतीये अहनि वा ब्राह्मणान् आहूय, आशिषः वाचयित्वा, दक्षिणां च वितीर्य तेभ्यः अनुज्ञां प्राप्य,मृत्संग्रहणार्थं प्राचीं उदीचिं वा दिशं गत्वा। तत्र पालिकादिषु पात्रेषु यथाभिमतं पूर्ववत् अङ्कुरान् अर्पयित्वा। शिल्पिना विमानदिग्देवतानां नयनेषु उन्मीलितेषु तं च वस्त्राभरणाद्यैः तोषयित्वा। तस्मिन् निर्गते

सति सदनं मार्जनालेपन पर्यग्निकरण पञ्चगव्य प्रोक्षणादिभिः शोधयित्वा, पुण्याहं वाचयित्वा। अब्लिंगैः मन्त्रैः गर्भगृहम् अन्तः बहिश्च संप्रोक्ष्य. गोघृत दीपिकालागरुप्रमुख गन्धद्रव्य धूप सुधार्चूर्ण दूर्वाक्षतैः सदनं सर्वतः समलङ्कृत्य। ततः अपराह्णसमये मानादीनां न्यूनातिरेक दोषशान्त्यर्थं प्रासादाग्रे यथाविधि शान्तिहोमं कृत्वा।‘ नमस्तुभ्यं भगवते’‘ इति उपस्थाय। सदर्भैः नववस्त्रैः मूलमन्त्रेण प्रासादान्तर्गत प्रतिमाः आच्छाद्य। उत्तरीयं च दत्वा। विष्णुगायत्र्या, अर्घ्यादिभिः संपूज्य। छायाधिवासार्थं विमानस्य तद्वतदेवतानां स्वस्य च रक्षाबन्धनं कृत्वा.विमानं द्वादशाक्षरेण अभ्यर्च्य। तस्यपुरतः छायाधिवासार्थं व्रीहि,तण्डुल तिलैः स्थण्डिलं कृत्वा।तस्मिन् स्वर्णादिलोह निर्मितं कटाहं, तादृशीं जलद्रोणीं वा संस्थाप्य। गन्धोदकेन आपूर्य।पुण्याहंवाचयित्वा। द्वारतोरण कुम्भान् संस्थाप्य। जलस्य शोषणादि कृत्वा। क्षीरार्णवं ध्यात्वा। तस्मिन् आधारादि पद्मान्तं पीठं कल्पयित्वा। अष्टाविंशति दर्भकृतकूर्चं मूलविद्यया विमानं आवाह्य। अभ्यर्च्य। आचार्यः संहारक्रमं स्मरन्। तस्मिन् तं प्राक्छिरसं शाययित्वा। चक्रमुद्रां प्रदर्श्य। विमानगतदेवतानां अपि द्वाविंशतिदर्भकृतकूर्च द्वारा पृथक् पृथक् स्वस्वपुरतः भाजनेषु यथाविधि छायाधिवासं कृत्वा। पूर्वस्थापित जलद्रोण्याः याम्यायां दिशि यथोक्तधान्यकृतस्थण्डिले सलक्षणं सकरकोपकुम्भाष्टकं सम्स्थाप्य। परिस्तीर्य। पुण्याहं वाचयित्वा,प्रोक्ष्य। मध्यकुम्भे ब्रह्माणं करके सुदर्शनं उपकुम्भाष्टके इन्द्रादीन् च आवाह्य. अभ्यर्च्य. प्रत्येकशः सर्वांगीणैः नवैः वासोभिः विमानं तद्वतप्रतिमाश्च आच्छाद्य।‘रक्षोहण’‘‘‘ इति मन्त्रेन सर्वतः सिद्धार्थान् विकीर्य.दिग्बन्धनं कृत्वा.दीपान् उद्दीप्य। चतसृषु दिक्षु,वेदान् उद्घोष्य. द्वारेसुदर्शनं आवाह्य अभ्यर्च्य। चक्रमुद्रां प्रदर्श्य। प्रादक्षिण्येन सदनात् निष्क्रम्य। आचार्यःसर्वालंकारयुतः मूर्तिपैः वेदविद्भिः ब्राह्मणैः साकं पूर्वोक्तमण्डपे, यथाविधि पूर्ववत् वास्तुहोमं कृत्वा। ततः मण्डपं मार्जनालेपनादिभिः संशोध्य। वितानस्तंभवेष्टन

मुक्तादाम स्रक्दर्भमाला तोरण फलपुष्पबहुदीपागरुधूप पताकानारिकेल कदलीभिः अलङ्कृत्य। द्वारतोरण ध्वजकुम्भान् सम्स्थाप्य। यथाविधि वस्त्राद्यः संयुक्तान् विधाय.ततः गुरुः अन्तः प्रविश्य छायाधिवासितान् देवान् विमानं च उद्वास्य। विमानस्थितवस्त्रादीनि अपनीय। तेषु यथाविधि पूर्वोक्तवर्त्मना नयनानि उन्मील्य। ततः सप्तदशकलशैः घृतादिद्रव्ययुतैः हरिद्राचूर्णैश्च, विमानस्य दिग्देवतानां च पृथक् पृथक् तथैव मृदालेपनपूर्वकं सर्वं स्नपनकलापं सकूर्चे दर्पणे कृत्वा। पुनः आवाह्य। विमानादिकं नवैः वासोभिः आच्छाद्य. प्रतिष्ठाविधिवत् मध्यवेदिकोपरि शय्यां कृत्वा। तस्यां कूर्चद्वारेण विमानदेवताः आवाह्य। शाययित्वा, तत्र व्रीह्यादिधान्य कल्पित स्थण्डिलोपरि, स्वर्णादि लोहजं मृण्मयं वा ससूत्रवेष्टनं सकरकोपकुम्भाष्टकं महाकुम्भं संस्थाप्य। गन्धोदकैः आपूर्य. तान्सरत्नलोह वस्त्र कूर्चपिप्पल दलापिधानान्कृत्वा. पुण्याहंवाचयित्वा। द्वारतोरण ध्वज कुम्भेषु यथाक्रमं तत्तद्देवताः आवाह्य। अभ्यर्च्य। महाकुम्भे आधारादिपद्मान्तं पीठं संकल्प्य। तस्मिन्,

सहस्रशीर्षं पुरुषं सहस्राक्षं सहस्रपम्।
सहस्रकुन्तलोपेतं सहस्रमकुटान्वितम्।
सहस्रादित्यसंकाशं सहस्रेन्दुनिभाननम्।
सहस्रवाहनैः युक्तं सर्व दिङ्नासिकान्वितम्।
शंखचक्रगदापाणिं सर्व प्रहरणान्वितम्।
प्रासादरूपिणं देवं ध्यात्वैवावाहयेत् गुरुः।।''इति ध्यात्वा।

'ओं नमोभगवते विमानाधिदैवताय नारायणाय आगच्छागच्छ''' इत्यावाह्य अभ्यर्च्य। करके सुदर्शनं उपकुम्भाष्टके विष्ण्वादिमूर्तीश्च आवाह्य अभ्यर्च्य। विमानं च तथा

ध्यात्वा। अभ्यर्च्य। चतुर्विधं अन्नं निवेद्य। ब्राह्मणान् भोजयित्वा। आशिषः वाचयित्वा। तेभ्यः अपि दक्षिणां वितीर्य। कुण्डेषु अग्निं यथाविधि उपसमिध्य। पुरस्तात्तन्त्रपूर्वकं मूर्तिहोमादिकं कृत्वा। धाम हेमादिनिर्मितं रत्नखचितं ध्यात्वा।

"तत्र जीवमपि ध्यायेत् व्यापकं तदुपादिकम्।
बुद्धिं च पिण्डिकां पादान् अहंकारं तथैव च।
पादौ पाद शिला जंघे गर्भगेहं तथोदरम्।
स्तम्भान् बाहून् कटिं चापि तथैव कटिमेखलाम्।
जिह्वां वर्णां तथा नेत्रं प्रतीपद्वाश्च मेहनम्।
अपानं जलनिर्याणं नासिकां नासिकां तथा।
गवाक्षमक्षि ग्रीवां च ग्रीवं स्कन्धं कपोलकौ।
शिरश्च कलशं मांसं प्रलेपं स्पर्शनं सुधाम्।
अस्थीनि च शिलास्तस्थाः स्नायुं दारुशिखाध्वजान्।
केशरोमाणि कूर्चं च ध्यात्वा धाम पुराकृतिं ।'

इति विमानं पुरुषाकृतिं ध्यात्वा। तदनु जीव तत्वहोमं प्रणवादि स्वाहान्तं पृथक् अष्टोत्तरशतं अष्टाविंशति अष्टौ वा आज्येन हुत्वा। संपाताज्यं संगृह्य। विमानस्य तत्तदङ्गेषु तत्तन्मन्त्रैरेव संस्पृशेत्।''ओं मं नमः पराय स्फटिकाभासाय जीवतत्वात्मने स्वाहा''धामनि.

'ओं भं नमःपरायसितवर्णाय प्रकृत्यात्मने स्वाहा'',धामनि(तत्रैव)।'

ओं बं नमः पराय स्फटिकाभासाय बुद्धि तत्वात्मने स्वाहा'',धामनि(तत्रैव)।'ओं फं नमः पराय पाटलवर्णाय अहंकारात्मने स्वाहा'',पिण्डिकायां।'ओं पं नमः पराय सितवर्णाय मनस्तत्वात्मने स्वाहा'',पिण्डिकायां(तत्रैव)।'ओं नं नमः पराय शुक्लवर्णाय

शब्दतन्मात्रात्मने स्वाहा'',क्षुद्रनासिकायां।'ओं धं नमः पराय लोहितवर्णाय स्पर्शतन्मात्रात्मने स्वाहा'',सुधालेपे।'ओं दं नमः पराय ज्योतिर्वर्णाय रूपतन्मात्रात्मने स्वाहा'',गवाक्षे।

ओं थं नमः पराय पाण्डरवर्णाय रसतन्मात्रात्मने स्वाहा - वर्णे।

ओं तं नमः पराय सितवर्णाय गन्धतन्मात्रात्मने स्वाहा - महानासिकासु।

ओं णं नमः पराय पाटलवर्णाय श्रोत्रेन्द्रियात्मने स्वाहा - पार्श्वनासिकासु।

ओं ढं नमः पराय हेमवर्णाय त्वगिन्द्रियात्मने स्वाहा - सुधालेपे।

ओं डं नमः पराय कृष्णवर्णाय नेत्रेन्द्रियात्मने स्वाहा - गवाक्षे।

ओं ठं नमः पराय गौर वर्णाय जिह्वेन्द्रियात्मने स्वाहा - वर्णे।

ओं टं नमः पराय सितवर्णाय घ्राणेन्द्रियात्मने स्वाहा - महानासासु।

ओं ञं नमः पराय सितवर्णाय वागिन्द्रियात्मने स्वाहा - वर्णे।

ओं झं नमः पराय रक्तवर्णाय पाणीन्द्रियात्मने स्वाहा - पादेषु।

ओं जं नमः पराय रक्तवर्णाय पादेन्द्रियात्मने स्वाहा - पादशिलायां।

ओं छं नमः पराय रक्तवर्णाय अपानेन्द्रियात्मने स्वाहा - जलनिर्याणे।

ओं चं नमः पराय हेमवर्णाय मेहनेन्द्रियात्मने स्वाहा - मेहने।

ओं कं नमः पराय जलदवर्णाय निराकाराय आकाशतत्वात्मने स्वाहा - नासिकादि शिखा

कुम्भान्तम्।

ओं खं नमः पराय धूम्रवर्णाय वेदिकाकाराय वायुतत्वात्मने स्वाहा - गर्भगेहादि नासान्तम्।

ओं गं नमः पराय लोहित वर्णाय त्रिकोणाकाराय अग्नितत्वात्मने स्वाहा - गर्भगेहे।

ओं घं नमः पराय स्फटिकवर्णाय अर्धचंद्राकाराय अप्तत्वात्मने स्वाहा - उपपीठादि

जलनिर्याणान्तम्।

ओं ङं नमः पराय पीतवर्णाय चतुरश्राय पृथिवीतत्वात्मने स्वाहा - उपपीठपादेषु।

एवं तत्व न्यासं च कृत्वा। ततः शक्तिहोमं न्यासं च कुर्यात्।

ओं प्रकृत्यै स्वाहा – अपाने ; ओं शान्त्यै स्वाहा – जगत्यां ;ओं पृथिव्यै स्वाहा – कुमुदे ;

ओं वागीश्वर्यै स्वाहा – गले ;ओं रत्यै स्वाहा, पट्टिकायाम्। एवं पञ्चाङ्गयुक्त विमाने।

द्वादशाङ्गकल्पने तु

ओं कीर्त्यै स्वाहा – महापट्टिकायाम् ;ओं पुष्ट्यै स्वाहा – गले ;

ओं माहीशक्त्यै स्वाहा – वाजने ;ओं तुष्ट्यै स्वाहा - पट्यां(वेद्यां) ;ओं सृष्ट्यै स्वाहा – अङ्घ्रिषु ;

ओं मायायै स्वाहा – कपोतेषु ;ओं मोहिन्यै स्वाहा – भूतमालासु ;

अष्टादशाङ्गकल्पने तु

ओं महालक्ष्म्यै स्वाहा – कूटेषु ;ओं वसुधायै स्वाहा – पञ्जरेषु ;ओं अतिमोहिन्यै स्वाहा -प्रस्तरेषु, ओं स्वाहाशक्त्यै स्वाहा – वेद्याम् ; ओं श्रियै स्वाहा - धाम्नि। इति शक्तिहोमं न्यासं च कुर्यात्।

अनन्तरं पूर्ववत् शान्तिहोमं स्पर्शहोमं च। तदनु दिङ्मूर्तीनाम् तत्वहोमं न्यासं च पृथक् पृथक् कृत्वा। सहस्त्रं शतं वा ब्राह्मणान् भोजयित्वा। तेभ्यः अपि दक्षिणां दत्वा।

विमानस्य प्रतिष्ठार्थं पञ्चविंशति तन्तुभिः पट्टिकायां दिङ्मूर्तीनां सौवर्णेन च रक्षाबन्धनं विधिवत् कृत्वा। तदनु पलल रजनीचूर्न लाज दधि सक्तुभिः बल्यन्तं सम्योज्य।तेन,

आद्याश्च कर्मजाश्चैव ये भूताः प्राग्दिशिस्थिताः।

प्रसन्नाः परितुष्टास्ते गृह्णन्तु बलिकांक्षिणः।।

वृक्षेषु पर्वताग्रेषु ये विदिक्षु च संस्थिताः।

भूमौव्योम्नि स्थिताः ये च बलिंगृह्णन्तु तेऽपि च।।

विनायकाः क्षेत्रपालाः ये चान्ये बलिकांक्षिणः।

पूषाद्याः पार्षदाश्चैव गृह्णन्तु बलिमद्य ते।।''

इति मन्त्रैः सर्वतः दिक्षु बलिदानं कृत्वा। तदनु प्रभाते सुमुहूर्ते सर्वालंकारयुतः गुरुः महाकुम्भ मूर्तिकुम्भान् समादाय। अग्रे गलन्तिकागलत् वारिधारया परिषिञ्चन् धामप्रदक्षिणी कृत्य। विमानाग्रे धान्यकृतस्थण्डिले तान् निधाय। आचार्यः उदङ्मुखस्सन् महाकुम्भस्यशक्तिं विमाने मूलमन्त्रेण मूर्तिकुम्भगतश्शक्तीः मूर्तिपेषु च विन्यस्य। विमानं सहस्त्रशीर्षं पुरुषं ध्यात्वा। महाकुम्भं समादाय। दिङ्मूर्तीः स्व स्वमन्त्रैः प्रोक्ष्य।तथैव अन्यान् विमानस्थदेवान् च प्रोक्ष्य। ततःविमानं तद्गतदेवताश्च अर्घ्यादिभिः अभ्यर्च्य। महाहविः निवेदयेत्। तदनु यजमानः गुरुं प्रणिपत्य। जीवजीवात्मकैः धनैः मूर्तिपान् अन्यान् च यथावित्तानुसारतः तोषयेत्।

इति विमानप्रतिष्ठाविधिः नाम एकविंशः परिच्छेदः

****

द्वाविंशः परिच्छेदः

मण्डप प्रतिष्ठा विधिः

अथ मण्डपप्रतिष्ठाविधिःउच्यते-

पूर्ववत्वेदिकां निर्माय।आलयविशोधनादि ध्यानान्तं सकलं कर्मजालं विमानप्रतिष्ठोक्त विधिना कृत्वा। आचार्यः,

मण्डपं विश्वकर्मीयं सर्वरत्न परिष्कृतम्

सौवर्णैः बहुभिः स्तम्भैः नवरत्नविराजितैः।

उत्तंभितं सर्वशक्तिमयं ध्यायेद्गुरुः स्वयम्।''

इति ध्यात्वा। विधिवत् अग्निं पुरस्तात्तन्त्रपूर्वकं संस्कृत्य। ततः शान्तिहोमं कृत्वा. सम्पाताज्येन मण्डपस्य तत्तस्थानेषु न्यसेत्।

ओं प्रकृत्यै स्वाहा –अपाने ;ओं वसुधायै स्वाहा – जगत्याम् ;ओं क्रियायै स्वाहा - वप्रे ; ओं मोहिन्यै स्वाहा''कंपे ; ओं रत्यै स्वाहा''वाजने ; ओं मायायै स्वाहा – ग्रीवायाम् ; ओं वागीश्वर्यै स्वाहा - प्रातकंपे ; ओं इष्टाशक्त्यै स्वाहा - कुमुदे ; ओं क्षमायै स्वाहा - पट्टिकायां ; ओं ब्राह्म्यै स्वाहा - स्तम्भपादशिलायाम् ; ओं वैष्णव्यै स्वाहा - स्तम्भे ; ओं कमलायै स्वाहा - कपोते ; ओं शान्त्यै स्वाहा''उत्तरे ; ओं पद्मायै स्वाहा - तुलायाम् ; ओं ऐशान्यै स्वाहा - सोपानपङ्क्तिषु, चतुर्षुमण्डपद्वारतोरणेषु अधः''ओं शान्त्यै स्वाहा - दक्षिणशाखायां,,ओं वाग्देव्यै स्वाहा उपरि,ओं श्रियै स्वाहा उत्तर शाखायाम्, ओं रत्यै स्वाहा -इति संपातेन न्यस्य।

शान्तिहोमावसानिकं सर्वं कर्म पूर्ववत् निर्वर्त्य। ततः प्रभाते सुमुहूर्ते गुरुः स्वयं महाकुम्भं समादाय पूर्वोक्ताः शक्तीः स्वस्वमन्त्रेण नमोन्तैः आगच्छपदसंयुक्तैः मण्डपे पूर्वोक्तस्थानेषु न्यस्य। व्यापकरूपेण विचिन्त्य। तत्रस्थानि चित्राणि चित्राभासानि च कुम्भस्थवारिणा कूर्चेन स्वस्वमन्त्रेण यथापूर्वं प्रोक्षयेत्। तदनु यजमानश्च पूर्ववत् गुरवे दक्षिणां दद्यात्।

आस्थान मण्डपप्रतिष्ठा

आस्थानमण्डपादीनाम तु मण्डपशोधन पर्यग्निकरण पञ्चगव्य प्रोक्षण वास्तुहोम पुण्याहवाचन बलिकुम्भस्थापनादिकं कृत्वा। एकस्मिन् कुण्डे आहुतीश्च हुत्वा। आचार्यः

सुमुहूर्ते महाकुम्भ जलेन पूर्ववत् प्रोक्षयेत्। सर्वमपि कर्म सद्यः वा कुर्यात्। गुरवे दक्षिणा च पूर्ववत्।

गोपुरप्रतिष्ठा गोपुरप्रतिष्ठां विमानप्रतिष्ठावत् कुर्यात्। प्राकारप्रतिष्ठायां तु अङ्कुरार्पणादिकं सर्वं यथापूर्वं विधाय। गुरुः वर्ममन्त्रेण प्राकारं प्रोक्षयेत्। दक्षिणा च पूर्ववत्।

द्वारशाखाकवाटप्रतिष्ठे तावत् आदौ एव उक्ते। अत्रापि तथैव कुर्यात्।

इति श्री वराहगुरुणा विरचितायां क्रियाकैरव चन्द्रिकायां मण्डप, आस्थान मण्डप, गोपुर , प्राकार, द्वारशाखा, कवाट प्रतिष्ठा विधिः नाम .द्वाविंशः परिच्छेदः

****

अथ त्रयोविंशः परिच्छेदः

बलिपीठनिर्माण प्रतिष्ठे

अथ बलिपीठनिर्माण विधिः उच्यते-

बलिपीठिकां गर्भमन्दिरसमायाम विस्तारां, तदर्धां, तुरीयांश समां वा, यद्वा गर्भमन्दिरं पञ्चधा विभज्य। तद्वंशां एकांशां वा अथवा नवसु एकभागसमां यद्वा हस्तवशेन एकहस्तावरां, पञ्चहस्तपरां वा विस्तार द्विगुणोत्सेधां, त्रिगुणोत्सेधां, अर्धार्धिकां, विस्तारतुल्योत्सेधां वा, पञ्चाङ्गकल्पनोपेताम्, कपोतभूतमाला हंसमालादि विराजितां निर्माय, तदग्रविस्तृतिं त्रेधा विभज्य, द्वाभ्यां पंकजं विधाय।

पीठिकाकोणेषु गरुडान् सिह्मान् वा प्रागादिषु विघ्नराडीशपक्षीश दुर्गाः यथोन्नति पार्श्वे सोपानपङ्क्तीश्च कल्पयेत्।

बलिपीठप्रतिष्ठा विधिः उच्यते-

एवं पीठिकां गोपुरास्थानमण्डपयोः मध्ये कल्पयित्वा। यथायोगं अष्टसु दिक्षु बलिपीठानि तालद्वयेन विस्तारायामयुतानि प्रत्येकं चतुरङ्गुलोन्नत मेखलात्रययुतानि, तन्मध्ये वृत्ताकारेण चतुरश्राकारेण वा चतुरङ्गुलायाम विस्तारकर्णिकायुतानि च कृत्वा। गेहस्यपरितः पूर्वाद्यासु संस्थापयेत् । माहापीठस्य पश्चिमभागे ध्वजस्तंभस्य पीठं च निर्मिमीत। प्रासादाभिमुखः स्तंभः कल्पनीयः। यथा पूर्वाभिमुखे देवे प्रत्यङ्मुखः, पश्चिमाभिमुखे देवे पूर्वाभिमुखः, सर्वं संस्थाप्य। आचार्यः वास्तुहोमाङ्कुरावापनादिकं सर्वं क्रियाकलापं शान्तिहोमावसानिकं मन्दिरस्य इव कृत्वा।

ततः प्रभाते सुमुहूर्ते मूलविद्यया महाकुम्भजलेन पीठं कूर्चेन सम्प्रोक्ष्य। तस्मिन् प्राच्यां विघ्नराजाय नमः, दक्षिणे ओं ईशानाय नमः,पश्चिमे ओं पक्षिराजाय नमः,उत्तरे ओं दुर्गायै नमः, मध्यकर्णिकायां ओं सर्वेभ्यः विष्णुपार्षदेभ्यः नमः इति प्रोक्ष्य। अष्टास्वपि दिक्षु कुमुदादिगणेशान् स्वैः स्वैः अनुचरैः सह, स्वस्वमन्त्रेण आवाह्यसान्निध्यं प्रार्थ्य। तेषु नित्यं बलिं दद्यात्। यजमानः यथाशक्ति ब्राह्मणान् भोजयित्वा। तेभ्यः दक्षिणां वितीर्य। आचार्याय शतनिष्कां दक्षिणां दद्यात्।

अथ महानस प्रतिष्ठाविधिः-

आचार्यः तत्र वास्तुहोमादिकं सर्वं कृत्वा।धान्यराशौ सलक्षणं कुम्भं एकं विन्यस्य। तस्मिन् मूलेन आवाह्य, अभ्यर्च्य। अग्निं संसाध्य। समिदाज्य चरुपायसैः प्रतिद्रव्यं मूलमन्त्रेण अष्टोत्तरशताहुतीः हुत्वा। तत्रस्थानां देवानां चण्डप्रचण्ड क्षेत्रपालरुद्र गणेश जृंभल मणिभद्र शिभिकुण्डल धर्म अधर्म धातृविधातृ लक्ष्म्याद्यानां होमपूर्वं तत्वन्यासादिकं कर्म कृत्वा। चुल्लीषु ‘‘अग्निमीले इति मन्त्रेण अग्निं निदधीत। तत्र

पायसादीनां हविषां श्रपणं परिचारकाःकुर्युः।नित्यहोमार्थं कुण्डे अग्निं पुरस्तात्तन्त्रपूर्वकं यथाविधि स्थापयित्वा। तदनु महाकुम्भजलेन चण्डादीनां न्यसनं कुर्यात्।

महानस द्वारे- ओं चण्डाय नमः, ओं प्रचण्डाय नमः,
दक्षिण पार्श्वे -ओं क्षेत्रपालाय नमः,ओं ईश्वराय नमः,उत्तरे-ओं गणपतये नमः,ओं जृंभलाय नमः,पश्चिमे ओं मणिभद्राय नमः, ओं शिबिकुण्डलाय नमः, अन्येषु द्वारेषु सत्सु, प्रासादद्वारवत् लक्ष्म्यादीनां कल्पनं चरेत्। चुल्याः वामे ओं धर्माय नमः,ओं अधर्माय नमः,पृष्ठतःओं धात्रे नमः,अग्रेओं विधात्रे नमः, तत्रैव चुल्ल्याभिमुखं महालक्ष्म्यै नमः, दीर्घचुल्यास्तु उभयोः पार्श्वयोः,धर्माऽधर्मौ कल्पयेत्।सर्वान् तान् अभ्यर्च्य। तत्र स्थानि सकलानि पात्राणि कुम्भजलेन श्रीसूक्तेन प्रोक्षयेत्।गुरवे दक्षिणा च पूर्ववत्।

धान्यागार प्रतिष्ठा

धान्यागार धनागार सारस्वतगृह मज्जनशाला पुष्पवाटिकासदन तांबूलकल्पन गृहतैल स्थानादीनां धाम्नाम् शिल्पिभिः कल्पितानां आचार्यः शास्त्रोक्तेन विधिना वास्तुहोमादि प्रोक्षणान्तं सर्वं मण्डपस्य इव कुर्यात्। दक्षिणाच यथावसु देया।

अथ वापीकूप तटाकप्रतिष्ठा

तेषां भागे पश्चिमे चतुर्हस्तायामं एकहस्तोच्छ्रितां वेदिकां कल्पयित्वा। सुवर्णेन अल्पकायं जलाधिदैवतं निर्माय। सुवर्णादिलोहजान् मृण्मयान् वा कलशान् सरत्न लोहकूर्चापिधानान् नव धान्यराशौ संस्थाप्य।यथाविधि आवाह्य अभ्यर्च्य। तैः

जलाधिदैवतं विधिवत् स्नापयित्वा। तदनु वेदिकायां सलक्षणायां शाययित्वा। तत्र महाकुम्भं संस्थाप्य। तस्मिन् जलाधिदैवतं आवाह्य अभ्यर्च्य। चतुर्षु कुण्डेषु एकस्मिन् वा अग्निं उपसमिध्य।तत्र तं आवाह्य। तद्दैवत्यैः मन्त्रैः समिदाज्य चरुभिः पृथक् अष्टोत्तरशताहुतीः हुत्वा। भूसुरैः वारुणसूक्तानि पाठयित्वा। ततः प्रभाते सुलग्ने पुण्याहं वाचयित्वा। वाप्यादीन् प्रोक्ष्य। आचार्यः अमृतवारिभिः पूरितान् विचिन्त्य। ततः सुवर्णादि लोहकृतानि मत्स्यकूर्मादीनि जलाधिदेवताप्रतिमां महाकुम्भं च वाप्यादिषु निक्षिप्य।तत्र गङ्गादिसर्वसरितः स्वस्वमन्त्रैरेव आवाहयेत्। यजमानः गुरवे यथावसु दक्षिणां दत्वा। तत्र ब्राह्मणान् भोजयित्वा। तेभ्यः अपि यथाशक्ति दक्षिणां दद्यात्।

इति श्री वराहगुरुणा विरचितायां क्रियाकैरव चन्द्रिकायांबलिपीठनिर्माण तत्प्रतिष्ठा-महानसधान्यागार-वापीकूप तटाकप्रतिष्ठा- विधिः नाम त्रयोविंशः परिच्छेदः

****

अथ चतुर्विंशः परिच्छेदः

प्रभाप्रतिष्ठा

अथ प्रभादीनां प्रतिष्ठाविधिः उच्यते-

कालांतरे चेत् प्रभादीनां प्रतिष्ठा, जलाधिवासाद्यखिलं कर्म यथापूर्वं कृत्वा। गुरुः ज्वालामालासहस्राढ्यां विद्युत्संघातसन्निभां प्रभां ध्यात्वा। संस्पृश्य।

अग्नौसमिदाज्यचरुभिः मूलमन्त्रेण प्रत्येकं अष्टोत्तरशतं आहुतीनां हुत्वा। सर्पिषा शान्ति होमं च हुत्वा। संपातेन प्रभां संस्पृश्य। प्रभाते कुम्भवारिणा मूलेनप्रोक्ष्य। प्रभां सुमुहूर्ते देवेन संयोज्य। महोत्सवं कुर्यात्। गुरवे दक्षिणा च पूर्ववत्।

पीठस्थापनम्।पीठस्थापने तु गुरुः तत्र पीठम् सम्स्थाप्य। योगासनमन्त्रैः आधारादि पद्मान्तैः अग्नौ हुत्वा। संपातेन पीठं संस्पृश्य. पद्म पीठं सुमुहूर्ते देवेन योजयेत्। दक्षिणा च पूर्ववत्।

अथ घण्टा प्रतिष्ठा उच्यते

घण्टां पञ्चगव्येन पञ्चवारुणिकैः मन्त्रैः संस्नाप्य। नववाससा आवेष्ट्य।

शालितण्डुलतिलैः स्थण्डिलं कृत्वा. तदूर्ध्वे नववस्त्रं सदर्भं विन्यस्य। तत्र घण्टां तन्मन्त्रेण शाययित्वा। नवेन वाससा आच्छाद्य। तत्रसलक्षनं कुम्भं एकं सम्स्थाप्य। तस्मिन्''शब्दब्रह्मस्वरूपिण्यै ओं घण्टायै नमः'' इति आवाह्य अभ्यर्च्य।

कुण्डेस्थण्डिले वा तन्मन्त्रेण समिदादिभिः पृथक् अष्टोत्तरशतं आहुतीनां, चरुणा नृसूक्तेन षोडश च हुत्वा। तां शब्दब्रह्ममयीं ध्यात्वा। शान्तिहोमं कृत्वा। संपातेन घण्टां सम्स्पृश्य। प्रभाते कुम्भतोयेन प्रोक्ष्य। ततः घण्टां देवस्य सर्वकर्मसु चालयेत्।गुरवे दक्षिणा पूर्ववत्।

धूप दीपप्रतिष्ठा

धूपदीपयोस्तु पूर्ववत् सर्वं कर्म कृत्वा।''ओं धूपपात्राधिदैवताय पावकाय नमः'' इति धूपं, ओं दीपपात्राधिदैवताय भास्कराय नमः'' इति दीपं च होमानन्तरं महाकुम्भ जलेनप्रोक्षयेत्। दक्षिणा च पूर्ववत्।

भेर्यादि प्रतिष्ठा-भेर्यादीनां पञ्चगव्येन शुद्धिंकुर्यात्।

रथादीनां छत्रादीनां च प्रतिष्ठा

रथादियानानां तु शुद्धिं पूर्ववत् कृत्वा। स्वस्वदेवतामन्त्रेण महाकुंभजलेन प्रोक्षणं कुर्यात्। छत्रादीनामपि पूर्ववत्.सर्वत्र ब्राह्मणान् भोजयित्वा. पुण्याहपूर्वकं यथाविधि सर्वं कर्मकुर्यात्। यजमानश्च गुरवे वित्तानुसारतः दक्षिणां दद्यात्।

अक्षमला प्रतिष्ठाविधिः

अथ अक्षमालाप्रतिष्ठा विधिः उच्यते

सुवर्ण रजत ताम्र त्रपु सीस कांस्यायस्फटिक सूर्यकान्त चन्द्रोपल पुत्र जीवेन्द्राक्षी विभीतिका निंब पद्म सित अंभोज कमलाक्ष रुद्राक्ष शङ्ख जलज कुशग्रन्त्यादिषु जग्रुः अभिमत कर्मानुगुणान् मणीन् अष्टोत्तरशतसंख्याकान् तदर्धान् सप्तविंशति संख्याकान् वा अक्षास्थि तुल्यान् धात्रीफलास्थिसदृशान् बदरास्थि समानान् वा संपाद्य.तान् दोषवर्जितान् निरीक्ष्य। पञ्चवारुणिकैः पञ्चोपनिषत् मन्त्रैश्च पञ्चगव्यैः संक्षाल्य। तान् हेमै राजते वा सूत्रे त्रिगुणीकृते केशादि दोषवर्जिते कार्पाससूत्रे वा पृष्ठेन पृष्ठं मुखेन मुखं परस्परं यथा न संबध्येत। तथा अन्तरांतरा सुवर्णेन वा सूत्रेणवा मध्यबन्धयुतान् आरोप्य। तां मालां कटकाकारं कृत्वा।

तन्मालौमहत्तरं अन्यं मणिं निधाय। एवं अक्षमालिकां कृत्वा। तां पुण्याहजलेन प्रोक्ष्य। पद्मदलेसंस्थाप्य। कुंकुमाद्यैःविलिप्य। शालितण्डुलैः, भारादिप्रमाणयुतैः स्थण्डिलं कृत्वा। तत्र चक्रपद्मं विलिख्य। कुशैः नववस्त्रैश्च आच्छाद्य। हेमवस्त्रयुतं महाकुम्भं धान्यपीठे निक्षिप्य। तस्मिन् 'ओं नमो अक्षमालिकाधि दैवताय मन्त्रपुरुषाय नमः'' इति मन्त्रेण आवाह्य अभ्यर्च्य कुण्डेस्थण्डिले वा अग्निं उपसमिध्य। समिच्चरुघृतैः तन्मन्त्रेण पृथक् अष्टोत्तरशतं आहुतीनां हुत्वा। तस्याः शोषणादि कृत्वा। तां अण्डमयीं ध्यात्वा।तन्मध्येपुरुषं ध्यायेत् बद्धाञ्जलिमवस्थितम्।

चतुर्भुजं वलक्षाभं वरदाभयहस्तकम्।

अक्षमालां च बिभ्राणं शिखाग्रे कटकाकृतिम्।

इति ध्यात्वा।तदनु शान्तिहोमानन्तरं संपातेन तां संस्पृश्य। सुमुहूर्ते तस्यां सृष्टिक्रमेण तत्वानि विन्यस्य। आचार्यः स्वहृदयकमले मन्त्ररूपिणीं अभिन्नां तेजसा आदित्यसंकाशां वैष्णवींशक्तिं ध्यात्वा। तां ब्रह्मरन्ध्रात् अक्षमालिकायां तन्मन्त्रेण आवाह्य। महाकुम्भ जलेन प्रोक्ष्य।

सन्निधत्तां भवान् देव मन्त्रमूर्ते जनार्दन।

जपाक्षमालावलये भक्तानुग्रहकाम्यया।।

इति गाथां उदीर्य, तत्र मन्त्रविग्रहं अक्षमालां बिभ्राणं चतुर्भुजं वलक्षाभं देवं ध्यात्वा। अभ्यर्च्य। गुरुः यजमानाय दद्यात्। पूर्वं गुरुः अक्षमालायां यं मन्त्रं स्थापितवान् तमेव गणयेत्। यथावित्तं गुरवे दक्षिणा देया।

इति श्री वराहगुरुणा विरचितायां क्रियाकैरव चन्द्रिकायां प्रभापीठ घण्टाधूपदीपभेर्यादिवाद्य रथादियान छत्रादिपरिबर्हाक्षमालाप्रतिष्ठा विधिः नाम चतुर्विंशः परिच्छेदः

****

अथ पञ्चविंशः परिच्छेदः

गृहार्चा प्रतिष्ठा

अथ गृहार्चा प्रतिष्ठाविधिः उच्यते-सुवर्णादिलोहजां,यद्वा चन्दनाऽगरु देवदारु बिल्व सरल तमाल चूत बदरी पनस क्षीरिणी सप्तलाजाति स्पन्दन तिमिश कदंब कुरवक तिलक मधूकासन जंबू पुन्नाग कनद खदिर निंब विभीतिक शाल्मल्यादि वृक्षजां यजमानाभीष्ट कर्मानुरूपां ब्राह्मणस्य चेत् हस्तमानमितां, क्षत्रियस्यचेत् एकविंशाङ्गुलमानां वैश्यस्य चेत् एकोनविंशाङ्गुलां, शूद्रस्य सप्तविंशाङ्गुलां, लोहजां चेत् ब्राह्मणस्य द्वादशाङ्गुलमानेन, क्षत्रियस्य नवाङ्गुलमानेन, विशः सप्ताङ्गुलमानेन, शूद्रस्य पञ्चाङ्गुलेन कृतां प्रतिमां रत्नजां मणिजां वा श्रीभूमिभ्यां श्रियावा युतां केवलां वा प्रभा पीठादियुतां सलक्षणां संहारशयनमात्ररहितां यथाविधि शिल्पिना कारयित्वा। गृहस्य मारुत्यां दिशि स्थापयेत्।

तत्प्रतिष्ठार्थं सर्वान् संभारान्संभृत्य। यजमानःस्वयं आचार्यवरणं कृत्वा ।

अंगणे नदीतीरे वा, यद्वा सुपूजिते क्षेत्रे प्रपां समध्यवेदिकां सचतुष्कुण्डां सैककुण्डें वा निर्माय, आचार्येण प्रतिष्ठां कारयेत्।

आचार्यः पूर्वं अङ्कुरान् अर्पयित्वा। तदनु जलाधिवास नयनोन्मीलन पाद्यादि द्रव्यकलशस्नपन शयनाधिवास कुम्भावाहनादिकं यथापूर्वं प्रतिष्ठायामिव कृत्वा। कुण्डे अग्निं उपसमिध्य। पुरस्तात्तन्त्रपूर्वकं तत्वहोमादि शान्तिहोमावसानिकं हुत्वा। पूर्ववत् संपातेन संस्पृश्य।

सुमुहूर्ते प्रतिमास्थापनस्थाने रत्नन्यासं कृत्वा। तत्र यथाविधि संस्थाप्य।

आवाहनादिकं कर्म कुर्यात्। जङ्गमस्य चेत् आवाहनादिकं अभिप्रेत वेदिकायां कृत्वा। तदनु स्थाने स्थापयेत्। द्वारे चण्ड प्रचण्ड क्षेत्रपाल विघ्नेश वास्तुनाथ दुर्गा गुह विष्वक्सेन शङ्ख पद्मनिधीश्च आवाह्य अभ्यर्चयेत्।तदनु यजमानः च आचार्याचोदितः भूमौ दण्डवत् प्रणम्य इमां गाथां उदीरयेत्।

‘ दासोस्मि तव देवेश सपुत्रगणबान्धवः।
सन्निधत्स्व गृहे यावत् अन्ववायो महाच्युत।
पूजां मयां यथाशक्ति विहितां विकलामपि।
गृह्णीष्व भगवन् भक्तजनानुग्रह काम्यया।’’

इत्थं आचार्यसन्निधौ भगवन्तं याचयित्वा। गुरवे मूर्तिपेभ्यश्च यथाशक्ति दक्षिणां वितीर्य। ब्राह्मणान् भोजयित्वा तेभ्यः अपि दक्षिणां दद्यात्।

श्रीवत्सप्रतिष्ठाः-

अथ श्रीवत्सप्रतिष्ठा विधिः उच्यते-

श्रीवत्सं अग्रे शालिभारे सशाटिके निवेश्य। पुण्याहादिपूर्वकं सर्वं कर्म कृत्वा।तत्वानि विन्यस्य। कुम्भे च आवाह्य अभ्यर्च्य। पद्मकुण्डे अग्निं उपसमिध्य। श्रीवत्समन्त्रेण समिदाज्य चरुभिः प्रत्येकं अष्टोत्तरशतं आहुतीनां हुत्वा। तत्वहोमं शान्तिहोमं च कृत्वा।संपातेन स्पृष्ट्वा।

कुम्भजलेन प्रोक्ष्य। सुमुहूर्ते विष्णोः वक्षसि निवेशयेत्।गुरवे दक्षिणाच पूर्ववत्।

कौस्तुभ प्रतिष्ठाः-

कौस्तुभं तु यथापूर्वम् स्वमन्त्रेण स्थण्डिले स्थापयित्वा। सुवर्ण प्रतिमां कौस्तुभाकारेण कारयित्वा। महाकुम्भे विन्यस्य. पूर्ववत् सर्वं कर्म कुर्यात्।

वनमाला प्रतिष्ठाः-

वनमालां सुवर्णमयीं नानारत्न परिष्कृतां पूर्वोक्तविधानेन स्वमन्त्रेण प्रतिष्ठाप्य. सुमुहूर्ते विष्णोःकण्ठे लंबयेत्।

अथ किरीट प्रतिष्ठाः-

शुद्धकार्तस्वरमयं रत्नचितं वा किरीटं भगवद्योग्यं कृत्वा। पाद्यादि घृतान्तैः सप्तदशकलशैःकिरीटमन्त्रेण संस्नाप्य। सवस्त्रधान्यकृत स्थण्डिले निधाय। कुम्भे तन्मन्त्रेण आवाह्यअभ्यर्च्य। कुण्डचतुष्टये वा एकस्मिन् कुण्डे वा समिदाज्यचरुभिः तन्मन्त्रेण पृथक् अष्टोत्तरशताहुतीनां हुत्वा। शान्तिहोमं हुत्वा। संपातेन किरीटं संस्पृश्य। सुमुहूर्ते कुम्भजलेनस्वविद्यया प्रोक्ष्य। तदनु भद्रासने समासीनं देवं राजवत् उपचर्य.संस्नाप्य। अलंकृत्य आराध्य। वेदघोषैः वाद्यघोषैः सर्वोपचारैः सह आचार्यः मूर्तिपैः साकं पञ्चोपनिषन्मन्त्रैः देवस्य मूर्धनि किरीटं आरोप्य। देवं यानं आरोप्य। तूर्यघोष पुष्पवृष्ट्याद्युपचारपुरस्सरं ग्रामं प्रदक्षिणी कृत्य मन्दिरे विनिवेश्य अर्चयेत्। गुरवे दक्षिणा देया।

भूषणादि प्रतिष्ठाः-

हारादि नूपुरान्तं भूषणजालं द्वादशाक्षरेण गन्ध जलेन संक्षाल्य। धान्यराशौ संस्थाप्य। अग्नौ स्वविद्यया हुत्वा। तत्तद्भूषणं ध्यात्वा। द्वादशाक्षरमनुं जपन् तत्तन्मन्त्रेण तैस्तैः भूषणैः भूषयेत्।

चक्राद्यायुध प्रतिष्ठाः

अथ चक्राद्यायुधानां प्रतिष्ठाविधिः उच्यते।-

चक्रं तु हस्तमानेन यद्वा सप्तदशांगुलम्।
अष्टादशांगुलं यद्वा विंशत्यंगुलसंमितम्।
चतुर्दशांगुलं वापि षोडशांगुलमेव वा।
द्वादशांगुलमानं वा स्वलक्षण परिष्कृतम्।
मूलबिम्बाननसमं सहस्त्रारं समुज्वलम्।
यद्वा शतारमथवा चतुर्विंशत्यरान्वितम्।
षोडशारमथाष्टारम् अथवा षडरं वरम्।
सहस्त्रज्वालमथवा षड्ज्वालं नाभिमण्डितम्।
त्रिलोहनिर्मितं चक्रं नालपीठ समन्वितम्।
कृत्वा करण्डमकुटं बिभ्राणं वा सुदर्शनम्।
चतुर्भुजधरं क्रुद्धं भ्रुकुटी कुटिलाननम्।
पुरुषं द्विभुजं यद्वा दक्षिणेनापि तर्जनम्।
स्पृशन्तं कटिमन्येन च इतराभ्याम् कृताञ्जलिम्।
मुख्याभ्यां कराभ्यां तु सुस्थितं पद्मविष्टरे।''

एवं रूपयुतं चक्रं कल्पयित्वा। पूर्ववत् अङ्कुरार्पणजलाधिवास नयनोन्मीलन स्नपन शयनाधिवासद्वारतोरणकुम्भपूजानां अनन्तरं महाकुम्भे सुदर्शनं तन्मन्त्रेण आवाह्य। अभ्यर्च्य।

अत्युग्रं पुरुषं ध्यायेत् द्विभुजं रक्त वाससम्।
रक्तदंष्ट्राननम् नाभौ सुस्थितं चक्रनायकम्।''

इति ध्यात्वा। चतुष्कुण्डेषु यद्वा एकस्मिन् समिदाज्य चरुभिः तन्मन्त्रेण पृथक् अष्टोत्तरशतं आहुतीनां हुत्वा। चक्रं शोषणादिभिः संशोष्य। शान्तिहोमावसाने संपातेन नाभ्याद्यवयवान् संस्पृश्य। सुमुहूर्ते स्वविद्यया प्रोक्ष्य। सम्पूजयेत्।

शङ्खादि प्रतिष्ठाः

शङ्खादीनां चतुर्णाम् यथा पूर्वं आचार्यः स्वस्वमन्त्रैः प्रतिष्ठां कृत्वा। यथाविधि पूजयेत्। गुरवे दक्षिणां च पूर्ववत्।

चण्डादिद्वारपाल प्रतिष्ठाः

चण्डादिद्वारपालानां जलाधिवासनयनोन्मीलन स्नपन शयनाधिवास एक कुम्भपूजन तत्वहोमन्यास शान्तिहोम(सम्पात)स्पर्शनादिकर्म कृत्वा।आचार्यः तत्तन्मन्त्रेण बीजयुक्तेन कुम्भजलेन प्रोक्षयेत्।गुरवे दक्षिणा च पूर्ववत्।

गरुड प्रतिष्ठाः

अथ वैनतेयप्रतिष्ठा विधिः उच्यते

अङ्कुरावापनादि कर्मं यथाविधि पूर्ववत् कृत्वा। आचार्यः पूर्वादिषु चतुर्षु कोणेषु क्रमेण सत्य सुपर्ण गरुड तार्क्ष्यान् आवाह्य। तेषु क्रमेण बृहत्साम, सुपर्णमनु ,रथन्तर, गरुडगायत्री मन्त्रैः प्रत्येकं प्रतिद्रव्यं अष्टोत्तरशतं आहुतीनां हुत्वा। परस्तादुपरिष्टाश्च शिष्टं कर्म यथापूर्वं कुर्यात्। गुरवे दक्षिणा च देया।

आदित्यप्रतिष्ठाः

आदित्यप्रतिष्ठायां तु स्व गायत्र्याराधनम्। तथैव होमः। 'बिभ्राडि' त्यनुवाकेन सावि
त्र्या च स्थापनं सूर्यविद्यया कुम्भप्रोक्षणं च कुर्यात्।

ब्रह्मादीनां च सर्वेषां देवानां च यथा पुरम्।
स्वतन्त्रे परतन्त्रे च स्वैः मन्त्रैः स्थापनं भवेत्।
दुर्गा च मातरः सप्त याः कश्चित् देवताः स्त्रियः।
तासां प्रतिष्ठा लक्ष्मीवत् स्वैः स्वैः मन्त्रैः विशिष्यते।

विष्वक्सेन प्रतिष्ठाः

विष्वक्सेनस्य भगवत्बिबस्येव सर्वकर्माणि कृत्वा। स्वमन्त्रेण स्थापनं कुर्यात्। सर्वत्र
दक्षिणा च पूर्ववत्।

भक्तप्रतिष्ठा विधिः

भक्तानां प्रतिकायं स्वतन्त्रं स्वामितन्त्रं वा शिलादिभिः यथालाभं कृताञ्जलिपुटं सौम्यं
स्थितं आसीनं यथावर्ण रूपं यथाश्रमधर्मं यथावयोरूपधरं पद्मपीठे प्रतिष्ठितं
कर्मानुरूप्येण वा प्रतिष्ठितं शिल्पिना कल्पयित्वा। शुभेदिने गुरुः आदौ अङ्कुरान्
युग्मास्वेव पालिकासु अर्पयित्वा। वेदिकाधिवासन कुम्भाष्टकरहितं सर्वं अन्यत्
कर्मजालं पूर्ववत्। द्वारतोरणयजन पूर्वकं प्रणवेन अन्यैः मन्त्रैश्च यथाविधि कृत्वा।
कुम्भप्रोक्षणं तन्मन्त्रेणैव कुर्यात्। तेषां स्वातन्त्र्ये सिह्मदिर्ज्मूर्ति वर्जितं मन्दिरं कुर्यात्।

दीक्षा गुरु प्रतिष्ठाः

आचार्यः मन्त्रसिद्धये दीक्षागुरोः प्रतिमां कृत्वा। पुण्याहपूर्वकं सर्वं कर्मजालं भक्तानामिव
कृत्वा। ब्राह्मणान् भोजयित्वा। तेभ्यःदक्षिणां च वितीर्य। तत्र
स्वाध्यायाऽध्ययनादिविप्रैः कारयित्वा। स्वयं च कुर्यात्। तेषां स्वातन्त्र्ये ध्वजारोहण

होमबलि तीर्थयात्रारहितमुत्सवं कुर्यात्। पारतन्त्र्ये भगवता साकं भगवत्प्रीतये कुर्यात्। गुरवे दक्षिणा च पूर्ववत्।

इति श्री वराहगुरुणा विरचितायां क्रियाकैरव चन्द्रिकायां गृहार्चा ,श्रीवत्स, कौस्तुभ, वनमाला, किरीट, भूषण, चक्राद्यायुध, चण्डादिद्वारपाल, गरुडः आदित्य भक्ता, दीक्षागुरुप्रतिष्ठाविधिःनाम पञ्चविंशः परिच्छेदः

****

इति क्रियापाद प्रयोगः